

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रं० २

3328

मीमांसा न्यायप्रकाश

Acc. NO. ~~3328~~ M-1665

Title - मीमांसान्याय प्रकाश.

Author - आपदेव.

Date - ?

Subject - तत्वज्ञान. पूर्वमीमांसा.

folio - 50

Xerox - 98.

K K S U LIBRARY RAMTEK 441 106 M-1665 Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या०प्र०

॥श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥अविघ्नमस्तु॥यत्कृपालेशमात्रेणपुरुषार्थचतुष्टयं॥प्राप्यतेतमहंवंदेगोविंदंभक्तवत्सलं॥अनं
तगुणसंपन्नमनंतम जनप्रियं॥अनंतरूपिणंवंदेगुरुमानंदरूपिणं॥२॥इहखलुपरमकारुणिकेनभगवताजैमिनिऋषिणाअथातो
धर्मजिज्ञासेत्यादिनाद्वादशस्वध्यायेषुधर्मोविचारितः॥तत्रवेदेनप्रयोजनमुद्दिश्यविधीयमानोऽर्थोधर्मः।यथायागादिः।सहियज
जेतस्वर्गकामइत्यादिवाक्येनस्वर्गमुद्दिश्यविधीयते।तथाहियजेतेत्यत्रहिअस्त्यंशद्वयंयजिधातुः।प्रत्ययश्च।प्रत्ययेऽप्यंशद्व
यं।आख्यातत्वंलिङ्त्वंच।आख्यातत्वंचदशस्वलकारेषुविद्यते।लिङ्त्वंपुनःकेवललिङ्येव।तत्राख्यातत्वलिङ्त्वाभ्यांभावनैवो
च्यते॥भावनानामभवितुर्भवनानुकूलोभावकव्यापारविशेषः।साचद्विविधा।शाब्दीभावनाआर्थीभावनाचेति।तत्रपुरुषप्रवृत्त्यनुकूलोव्या
पारविशेषःशाब्दीभावना।साचलिङ्त्वांशेनोच्यते।लिङ्श्रवणेऽयंमांप्रवर्त्तयतिमत्प्रवृत्त्यनुकूलव्यापारवानयमितिनियमेनप्रतीय-
मानत्वात्।यच्चयस्मात्प्रतीयतेतत्तस्यवाच्यं।यथागोशब्दस्यगोत्वं।सचप्रवृत्त्यनुकूलोव्यापारविशेषोलोकेपुरुषनिष्ठोभिप्रायविशे
षः।वेदेतुपुरुषाभावाल्लिङादिशब्दनिष्ठएव।नहिवेदःपुरुषनिर्मितः।वेदस्याध्ययनंसर्वंगुर्वध्ययनपूर्वकं॥वेदाध्ययनसामान्यात् अ

तङ्प्रः

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धुनाध्ययनंयथेत्यादिनावेदापौरुषेयत्वस्यसाधितत्वात्।यःकल्पःसकल्पःपूर्वइतिन्यायेनसंसारस्यानादित्वादीश्वरस्यसर्वज्ञत्वादीश्व
रोगतकल्पीयंवेदमस्मिन्कल्पेस्मृत्वाउपदिशतीत्येतावतैवोपपत्तौप्रमाणांतरेणार्थमुपलभ्यरचितत्वकल्पनानुपपत्तेश्च।ततश्चपुरुषा
भावाच्छब्दनिष्ठासा।अतएवशाब्दीभावनेतिव्यपदिशंति।साचशाब्दीभावनांशत्रयमपेक्षते।साध्यंसाधनंइतिकर्त्तव्यताचेति।तत्रसाध्या
कांक्षायांवक्ष्यमाणांशत्रयोपेतार्थीभावनासाध्यत्वेनसंबध्यते।एकप्रत्ययगम्यत्वेनसमानाभिधानश्रुतेः।यद्यपिसंख्यादीनामप्येक
प्रत्ययगम्यत्वंसमानं।तथाप्ययोग्यत्वात्तेषांभाव्यत्वेनान्वयः॥करणाकांक्षायांलिङादिज्ञानंकरणत्वेनसंबध्यते।तस्यचकरणत्वंनभाव
नोत्पादकत्वेनसन्निकर्षस्येवरूपादिज्ञानेसन्निकर्षात्मारूपादिज्ञानस्येवलिङादिज्ञानात्माकुशब्दधर्मभावनाया।अभावप्रसंगात्॥किंतुभा
शांदं वनाभाव्यनिर्वर्तकत्वेनलिङादिज्ञानंहिशाब्दधर्मभावनाभाव्यार्थभावनांनिर्वर्तयति।कुठारइवछेदनं।अतोलिङादिज्ञानस्यकरणत्वेनान्व
यः।इतिकर्तव्यताकांक्षायांप्राशस्त्यज्ञानमितिकर्तव्यतात्वेनसंबध्यते।तच्चप्राशस्त्यज्ञानंवायुर्वैक्षेपिष्ठादेवतेत्याद्यर्थवादैर्जन्यते॥
तेह्यर्थवादाःस्वार्थप्रतिपादनेनप्रयोजनमलभमानाःलक्षणयाक्रतोःप्राशस्त्यंप्रतिपादयंति।स्वार्थमात्रपरत्वेआनर्थक्यप्रसंगात्।न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या० प्र०

चेष्टापत्तिः। अध्ययनविध्युपात्तत्वेनानर्थक्यानुपपत्तेः। तथाहि। स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिः सकलस्य वेदस्य अध्ययनकर्तव्यतां
बोधयन् सर्वोऽपि वेदः प्रयोजनवदर्थपर्यवसायीति सूचयति। निरर्थकस्याध्ययनानुपपत्तेः। स च वेदो विधिमन्त्रनामधेयनिषेधार्थवादा
त्मकः। तत्र विधिः प्रयोजनवदर्थविधानेनार्थवान्। स चाप्राप्तमर्थं विधत्ते। यथा अग्निहोत्रं जुहुयात्स्वर्गकाम इति विधिरप्राप्तप्रयोजनव
द्धोमं विधत्ते। अग्निहोत्रहोमेन स्वर्गं भावयेदिति। यत्र तु कर्म प्रकारान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते। यथा दध्ना जुहुयादित्यत्र हो
मस्याग्निहोत्रं जुहुयादित्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानं। दध्ना होमं भावयेदिति। यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते। उ
क्तं। न चेदन्येन शिष्टा इति। शिष्टा उपदिष्टा इत्यर्थः। यथा सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात्सोमविशिष्टयागविधानं। सो
मवता यागेनेष्टं भावयेदिति। न चोभयविधाने वाक्यभेदः। विशिष्टस्यैकत्वात्। विशिष्टविधौ च मत्वर्थलक्षणा। यथा सोमपदेन मत्वर्थो
लक्ष्यते। सोमवतेति। न हि मत्वर्थलक्षणां विना सोमस्यान्वयः संभवतीति। यदि तावत्सोमयागयोरैकरूप्येण भावनायां करणत्वेनैवा
न्वयः। सोमेन यागेनेष्टं भावयेदिति। तत उभयविधाने वाक्यभेदः। सोमस्य यागवत्फलभावनाकरणत्वेन प्राधान्यापातश्च। यागार्थेना

२

न चेष्टापत्तिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुपपत्तिश्च। यागेद्व्यानुपपत्तिश्च। प्रत्ययवाच्यफलभावनायाः समानपदोपात्तेन यागेन करणाकांक्षानिवृत्तत्वेन भिन्नपदोपात्तस्य
सोमस्य करणत्वेनान्वयानुपपत्तिश्च स्यात्। यद्द्वैयधिकरण्येनान्वयस्तत्र न तावद्यागेन सोममित्यन्वयः। समानपदोपात्तप्रत्य
यवाच्यफलभावनाकरणत्वेनान्वितस्य यागस्य सोमकर्मकभावनान्वयानुपपत्तेः। यागस्य सोमार्थत्वापत्तिश्च। न चेष्टापत्तिः। अदृ
ष्टद्व्यापत्तेः। न हि यागस्य सोमार्थत्वं दृष्टद्वारेण संभवति। व्रीहिषु अवघातेनेव। यागेन सोमे कस्यचिद्दृष्टस्याजननात्। अतस्तेन
तावत्सोमे किंचिद्दृष्टं जननीयं। प्रोक्षणेनेव व्रीहिषु। तथा यागस्य सोमार्थत्वे फलभावनायां सोमस्य करणत्वेनान्वयो वक्तव्यः।
भावनाकरणत्वं च भावनाभाव्यनिर्वर्तकत्वेनेत्युक्तं। न च सोमो दृष्टमन्तरेणापि फलं जनयितुं समर्थः। यदहेजुहोतीति वाक्यविहित
होमेन तस्य भस्मीभावात्। अतो दृष्टद्व्यापातान्न यागस्य सोमार्थत्वमिति। न यागेन सोमं भावयेदित्यन्वयः संभवति। करणत्वेनो
पस्थितस्य सोमस्य साध्यत्वेनान्वयानुपपत्तेश्च। अथ सोमेन यागं भावयेदित्यन्वयस्तत्र यद्यपि सोमस्य यागार्थत्वाद्यागनिर्वृत्ति
दृष्टमेव प   यो जनं लभ्यत इति नादृष्टद्व्यापत्तिः। नापि करणत्वेनोपस्थितस्य सोमस्य साध्यत्वेनान्वयानुपपत्तिः। करणत्वेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वापेक्षयाऽऽश्रयत्वं विधेयत्वं उपादेयत्वं एकं त्रिकं गुणापेक्षयाऽऽश्रितत्वं अनुवादकत्वं उद्देश्यत्वं एकं त्रिकं।

वान्वयात्। तथाप्यप्राप्तत्वाद्भावनाकरणत्वेनान्वितस्य यागस्य साध्यत्वेनान्वयानुपपत्तिस्तदवस्थैव। ननु यजेतेत्यत्र यागस्य न करणत्वेन नापि साध्यत्वेनोपस्थितिः। तद्वाचकतृतीयाद्यभावात्। किंतु भावनायां यागसंबंधमात्रं प्रतीयते। यागस्य च भावनासंबंधः करणत्वेन साध्यत्वेन च संभवति। तत्र करणत्वांशमादाय फलसंबंधः। साध्यत्वांशमादाय गुणसंबंधश्च स्यादिति चेन्मैवं। यद्यपि भावनायां यागस्य संबंधमात्रं प्रतीयते तथापि करणत्वेनोपस्थितिदशायां न साध्यत्वेनोपस्थितिः संभवति विरोधात्। विरुद्धत्रिकद्वयापत्तेश्च। तदवश्यं यागेन स्वर्गं भावयेदिति करणत्वेनान्वये सति पश्चात्सोमेन यागं भावयेदिति साध्यत्वेनान्वयो वक्तव्यः। ततश्च वाक्यभेदः। न च प्रत्ययाभिहितभावनास्वरूपे यागस्वरूपमात्रमन्वेतीति युक्तं वक्तुं। कारकाणामेव क्रियान्वयात्। तत्सिद्धं सोमस्य यागेन सामानाधिकरण्येन वैयधिकरण्येन वाऽन्वयो न संभवतीति। ननु यजेतेत्यत्र प्रत्ययाभिहितभावनायाः करणाकांक्षायां यथा यागः करणत्वेनान्वेति। तथेतिकर्तव्यताकांक्षायां सोमस्येतिकर्तव्यतात्वेन भावनायामेवान्वयोऽस्तु किं मत्वर्थलक्षणयेति चेन्न। सोमेनेति तृतीयया करणत्ववाचिन्या सोमस्येतिकर्तव्यताला।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्नेर्ऋग्वेदो वायोर्यजुर्वेदः आदित्यात्सामवेदः अयमर्थवाद आदौ पठितः पश्चाच्च विधिः उच्चैरृचा क्रियते उपांशु यजुषा उच्चैः साम्नेति ॥ वि
धौ संजातविरोधित्वात् ॥ असंजातविरोधमर्थवादं तद्वेदपरं कृत्वा द्विरावृत्तिलक्षणसंजातविरोधिन्यायः
स

नभिधानात् । तत्र यदीतिकर्तव्यतात्वं लक्षणयोच्यते न तु तोवरं सोमपद एव प्रकृतिभूते मत्वर्थलक्षणा । गुणोपलक्षणाय कल्पनेति न्या
यात् । अथ वेदो वा प्रायदर्शनमित्यधिकरणोक्तासंजातविरोधिन्याये नीत्ये प्रत्यय एव लक्षणेति चेत् । तथापि सोमस्येतिकर्तव्यतात्वे
नान्वयानुपपत्तिः । सिद्धस्य वस्तुन इतिकर्तव्यतात्वाभावात् । क्रियाया एवेतिकर्तव्यतात्वात् । द्रव्यस्य केवलमंगत्वात् । अत एवेतिकर्त
व्यतात्वाभावात् द्रव्यस्य प्रकरणादग्रहणं यथाहुः । नावांतरक्रियायोगादृते वाक्योपकल्पितात् । गुणद्रव्यैकथं भावैर्प्रहंतिप्रकृताः
क्रिया इति । तदेतद्ध्येव स्यामः । किंच सोमेन यजेतेति हि यागस्योत्पत्तिवाक्यं । नाधिकारवाक्यं । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यस्या
धिकारवाक्यत्वात् । उत्पत्तिवाक्ये च नेतिकर्तव्यताकांक्षादृष्टविशेषाकांक्षाकलुषितत्वेन इतिकर्तव्यताकांक्षाया विस्पष्टमनुत्थानात् । तस्मि
श्च न सोमस्येतिकर्तव्यतात्वेन भावनायामन्वयः । तस्माद्विशिष्टविधावन्वयानुपपत्त्या अवश्यं मत्वर्थलक्षणा वाच्येति । नन्वेवमपि सोमेन यजे
तेत्यत्र न विशिष्टविधानं गौरवात् । मत्वर्थलक्षणापाताच्च । किं तु दध्ना जुहोतीतिवत् गुणमात्रविधानमस्तु । विधिशक्तेर्गुणे संक्रमात् । यथाहुः ।
सर्वत्राख्यातसंबंधे श्रूयमाणे पदांतरे । विधिशक्तेरुपसंक्रांतेः स्याद्धातोरनुवाद इति । न च यागस्याप्राप्तत्वात् तदुद्देशेन सोमविधानमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या०प्र०

वाच्यं। ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यनेन यागस्य प्राप्तत्वात्। न चास्याधिकारविधित्वेन नोत्पत्तिविधित्वमिति वाच्यं। उद्भिदा यजेत पशुकाम इतिवत् एकस्यैवोभयविधित्वोपपत्तेः। एवं च सोमेन यजेतेत्यत्र न मत्वर्थलक्षणा। यदि ह्यत्र विशिष्टविधानं स्यात्। तदान्वयानुपपत्त्या मत्वर्थलक्षणा स्यात्। ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र तु यागविधाने क्वचिन्न मत्वर्थलक्षणा। न तावदस्मिन्वाक्ये ज्योतिष्टोमेन यागेन स्वर्गं भावयेदिति सामानाधिकरण्येनैव नामपदस्यान्वयात्। नापि सोमेन यजेतेत्यत्र यागोद्देशेन सोमविधानात्। सोमेन यागं भावयेदिति। न त्वनुवादेप्यस्ति मत्वर्थलक्षणा। अत एवोक्तं। विधाने वानुवादे वा यागः करणमिष्यते। तत्समीपे तृतीयान्तं करणत्वं न मुंचतीति। अतश्च विशिष्टविधाविव गुणविधावप्यस्त्येव मत्वर्थलक्षणेति चेन्नैवं। गुणान्वयानुपपत्त्या हि मत्वर्थलक्षणांगीक्रियते। यदा च भावनायां धात्वर्थस्य करणत्वेनैवान्वयस्तदान्वयानुपपत्त्या सांगीकर्तव्या। गुणविधौ च न धात्वर्थस्य करणत्वेनान्वयः मानाभावात्। न हि दध्ना जुहोतीत्यत्र होमस्य करणत्वं श्रूयते। तद्वाचकतृतीयाद्यभावात्। कल्प्यत इति चेन्न। गुणस्य तत्र विधित्सितत्वेन साध्याकांक्षायां साध्यत्वकल्पनाया एवोचितत्वात्। दध्ना होमं भावयेदिति। न चायमस्ति नियमो भावनायां धात्वर्थस्य करणत्वेनैवान्वयो न प्रकारान्तरेणेति। षष्ठाद्यपूर्वपक्षानुत्थानापत्तेः।

नह्यन्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षष्ठाद्ये हि यजेत स्वर्गकाम इत्यादौ प्रत्ययवाच्यायां वक्ष्यमाणार्थभावनायां समानपदश्रुत्या यागस्य भाव्यत्वमाशंक्य पुरुषार्थत्वेन परिहृ-
तं। यदि धात्वर्थस्य करणत्वेनैव भावनायामन्वयस्तदा भाव्यत्वशंकैव नोदेतीति षष्ठाद्यमधिकरणमापद्येत। किंच वाजपेयाधिकरणे तंत्र
संबंधमाशंक्य परिहृतः। धात्वर्थस्य करणत्वेनैवान्वये तत्र संबंधशंकैव न स्यात्। तंत्र संबंधशंकापरिहारोच्यत्याख्यातो। किंच धात्वर्थस्य
नकरणत्वेनैवान्वयो गुणकामाधिकरणे आश्रयत्वेन धात्वर्थान्वयस्योक्तत्वात्। नयाहि। दध्नेन्द्रियकामस्य जुहुयादित्यत्र न तावद्धोमो विधी-
यते। तस्य वचनान्तरेण विहितत्वात्। नापि होमस्य फलसंबंधः। गुणपदानर्थक्यापत्तेः। नापि गुणसंबंधं विधत्ते। फलपदानर्थक्यापातात्। नाप्युभय-
संबंधं विधत्ते। प्रत्येकमपि अनेकविधाने वाक्यभेदापत्तेः॥ यथाहुः। प्रत्येकमपि नानेको विधातुं शक्यते गुणः। अप्राप्ते तु विधीयन्ते बहवोऽप्येक-
यत्नतः इति। अत्र कर्मपदवत् गुणद्रव्यफलक्षणं प्राप्तोद्देशेनानेकविधाने वाक्यभेदात्। अत एव यद्येकत्वाधिकरणे ग्रहं संमार्ष्टीत्यत्र ग्रहोद्दे-
शेन एकत्वसंमार्गविधाने वाक्यभेदात्। ग्रहैकत्वमविवक्षितमित्युक्तं। रेवत्यधिकरणेऽपि एतस्यैव रेवतीषु वारवंतीयमग्निष्टोमसाम कृत्वा
पशुकामो ह्येतेन यजेतेत्यत्र वारवंतीयस्य रेवतीसंबंधे अग्निष्टोमसामसंबंधे फलसंबंधे च विधीयमाने वाक्यभेदाद्भावनोपसर्जनं

होमर

एको

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावनांतरं विधीयत इत्युक्तं। तस्मात् प्राप्ते होमे नोभयविधानं संभवति। नापि होमांतरं गौरव प्रसंगात्। प्रकृतहानाप्रकृतकल्पनाप्र संगात्। मत्वर्थलक्षणाप्रसंगाच्च। नापि दध्येव केवलं करणत्वेन विधीयत इति युक्तं। केवलस्य व्यापाराना विष्टस्य करणत्वानुपपत्तेः। कर्तृ व्यापारव्याप्यत्व नियमात् करणस्य। किं तर्हि विधीयत इति चेत् दध्नेति तृतीयया उपात्तं दध्यधिकरणत्वं फलभावनायां करणत्वेन विधीयते। प्रत्ययार्थत्वेन दध्नोपि तस्य प्राधान्यात्। एवं च दधिकरणत्वेनेंद्रियं भावयेदिति वाक्यार्थः। करणत्वं च किं प्रति योगिकमित्यपेक्षायां संनि धिप्राप्तो होम आश्रयत्वेन संबध्यते। ततश्च सिद्धो धात्वर्थस्याश्रयत्वेनान्वयः। प्रकृतमनुसरामः। तत्सिद्धं धात्वर्थस्य न करणत्वेनैवान्वय इति। किं तर्हि क्वचित्करणत्वेन क्वचित्साध्यत्वेन क्वचिदाश्रयत्वेनेति। गुणविधौ च साध्यत्वेनैवान्वयः संभवतीति न मत्वर्थलक्षणायाः प्र योजनं। किं च गुणविधौ मत्वर्थलक्षणायां गुणस्य धात्वर्थांगत्वे किं मान मिति वक्तव्यं। न तावच्छ्रुतिः। मत्वर्थलक्षणायां तृतीया श्रुति मतेस्तैस्येवां गत्वे मानं स्यात्। न गुणस्यांगत्वे समभिव्याहाररूपकं वाक्यमिति चेत्। तत्किं स्वतंत्रमेव मानं लिंगश्रुती कल्पयित्वा वा। नाद्यः। बलाबलाधि करणविरोधात्। न त्रि द्वितीयलिंगश्रुती कल्पयित्वांगत्वे मानमित्युक्तं। द्वितीये प्रत्यक्षां श्रुतिमुत्सृज्य श्रुत्यंतरकल्पनेन तस्याप्रवाभावात्

(margin, right of line 7: र्थ)

(margin, left of last line: कंप)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्पने च यथा प्रयासः समाश्रितः स्यात् विशिष्टविधौ चागत्या तदाश्रयणं ॥ किंच भवन्मुक्त्यंतरकल्पनं । तथापि तत्सहकृतः प्रत्यक्षए
व वा विधिः धात्वर्थांगत्वेन गुणं विधत्ते । उत कल्पितविध्यंतरं वा कल्पितविध्यंतरमिति चेन्न । श्रुतविधेर्व्यर्थतापत्तेः । नहि तेन तदा गुणो वि
धीयते । कल्पितविध्यंतरांगीकारात् । नापि धात्वर्थः । तस्य वचनांतरेण विहितत्वात् । अथ श्रूयमाण एव विधिः कल्पितश्रुतिसहकृ
तो धात्वर्थांगत्वेन गुणं विधत्त इति चेत् । तर्हि तत्र कथं धात्वर्थे स्यान्वयः करणत्वेनेति चेन्न । अन्वयानुपपत्तेः । नहि संभवति दध्ना हो
मेनेति चान्वयः ॥ साध्यत्वेनैवान्वयो दध्ना होमं भावयेदिति चेन्न । तथा सति अनुवादेपि धात्वर्थः करणत्वेनैवान्वेति इत्येतदुपेक्षितं स्या
त् । विवक्षितवाक्यार्थश्च विनैव मत्वर्थलक्षणयोगीकृतः स्यात् । तस्मान्न गुणविधौ मत्वर्थलक्षणा । यत्तु विधाने वानुवादे इति वार्तिकं वे
तत्प्रतीतिमवलंब्य न वस्तुगतिं । तथाहि यावद्धि अग्निहोत्रं जुहुयादिति वाक्यं नालोच्यते । केवलं च दध्ना जुहोतीति वाक्यमालोच्यते त
दा षष्ठाद्यन्यायेन होमस्याभाव्यत्वं ज्ञानं तां प्रतिपदाधिकरणभावार्थाधिकरणवासनावासितानां भवत्येतादृशी मतिः । यद्वाधिम
ना होमेनेष्टं भावयेदिति । प्रतिपदाधिकरणे हि सोमेन यजेतेत्यादिषु किं गुणधात्वर्थयोः फलभावनाकरणत्वेनान्वयः उत एकस्यैवेति संदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्य॥ प्रधानसंबंधस्याभावात्॥ विनिगमनाविरहाच्च॥ सर्वेषां फलभावनाकरणत्वेनान्वयसाम्यं कल्प्यं॥ एवादेकस्यैव फलभावनाकरणत्वमित्युक्तं॥ भाव
नाकरणत्वं च भावनाभाव्यनिर्वर्तकतया भाव्यं च स्वर्गादिनादृष्टद्वारेणेति अनेकेषां करणत्वे अनेकादृष्टकल्पनाप्रसंगात्॥ तस्मादेकस्यैव
करणत्वं॥ यदाप्येकस्य तदापि किं द्रव्यगुणयोः फलभावनाकरणत्वं उत धात्वर्थस्येति हि भावार्थाधिकरणे संदिह्य द्रव्यगुणयोरेव भावनाक
रणत्वं॥ मूर्तं भव्यायोपदिश्यत इति न्यायादित्याशंक्य धात्वर्थस्यैव भावनाकरणत्वं पदश्रुतेर्बलीयस्त्वादित्युक्तं॥ अतश्चासिद्धमेतद्वाक्यान्तरमा ण
लोचनदशायां गुणविधावपि धात्वर्थस्य करणत्वशंकायां गुणपदे मत्वर्थलक्षणेति॥ यदा तु अग्निहोत्रं जुहोतीति होमविधायकं वाक्यान्तरमा
लोच्यते तदा होमस्य वाक्यान्तरेण विहितत्वात् तदुद्देशेन गुणमात्रं विधीयत इत्यालोचनान्न मत्वर्थलक्षणेति॥ अत एवोक्तं पार्थसारथिमिश्रैराधा
राग्निहोत्राद्यधिकरणे फलतो गुणविधिरयं न प्रतीतितः इति॥ यत्तु तद्वार्तिकं अधिकारविध्यभिप्रायं॥ उद्भिदा यजेतेत्यादीनां अधिकारात्॥ तत्र
हि यागो विधीयतां उत्पत्तिवाक्यसिद्धो यागोऽनूद्यतां॥ उभयथापि करणत्वेनान्वयात् तृतीयां तस्य तद्वाचित्वं॥ अन्यथान्वयानुपपत्तेरिति॥ तस्माद्गुण ६
विधौ विनापि लक्षणयान्वयोपपत्तेर्न मत्वर्थलक्षणेति॥ अमुष्य सोमेन यजेतेत्यत्र न विशिष्टविधानं किंतु गुणमात्रविधानं॥ यागस्तु ज्योतिष्टोमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न स्वर्गकामो यजेतेत्यस्मिन्वाक्ये विधीयत इत्येव युक्तं। अन्यथा मत्वर्थलक्षणापत्तेरिति। अत्रोच्यते। यद्यपि यागोद्देशेन सोमविधौ मत्वर्थलक्षणा। त
थापि यागस्याप्राप्तत्वात् सोमेन यजेतेत्यत्र यागोद्देशेन सोमविधानं न संभवति। न च ज्योतिष्टोमेनेत्यादिना प्राप्तत्वात्तदुद्देशेन गुणमात्रविधानमिति
वाच्यं। तस्याधिकारविधित्वेनोत्पत्तिविधित्वानुपपत्तेः। कर्मस्वरूपमात्रबोधको हि विधिरुत्पत्तिविधिः। तेन विहितस्य कर्मणः फलविशेषसंबंधमात्र
विशेषसंबंधे मधिकारविधिना क्रियते। फलसंबंधविशेषबोधकस्याधिकारविधित्वात्। यथाग्नेयोष्टाकपालो भवतीति उत्पत्तिविधिविहितस्य कर्मणः फलविशेष
संबंधमात्रं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्यं विधत्ते इति तस्याधिकारविधित्वं नोत्पत्तिविधित्वं। स्यादेतत्। दर्शपूर्णमासाभ्यामित्येतस्य नोत्प
त्तिविधित्वं संभवति। आग्नेयोष्टाकपाल इत्यादि वाक्यानर्थक्यापत्तेः। नहि तेन तदा कर्म विधीयते। तस्य दर्शपूर्णमासाभ्यामित्यनेन विहितत्वात्। नापि
गुणविधानं संभवति। प्राप्ते कर्मण्यनेकविधाने वाक्यभेदापत्तेः। अत आग्नेयोष्टाकपाल इत्यस्योत्पत्तिविधित्वं। दर्शपूर्णमासाभ्यामित्यस्याधिका
रविधित्वं युक्तं। ज्योतिष्टोमेनेत्यस्य तु अधिकारविधेः उद्भिदा यजेत पशुकाम इतिवत्। उत्पत्तिविधित्वे स्वीक्रियमाणे न कस्यचिदानर्थक्यं। सोमे
न यजेतेत्यस्य गुणविधित्वात्। यागोद्देशेन सोममात्रविधानाच्च। न वाक्यभेद इति। मैवं। यद्यपि। सोमेन यजेतेत्यत्र न वाक्यभेदस्तथापि ज्योतिष्टो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेनेत्यस्मिन्वाक्ये कर्मस्वरूपे तस्य च फलसंबंधे विधीयमाने गौरवलक्षणो वाक्यभेदोस्त्येव। सोमेन यजेतेत्येतद्वाक्य विहितकर्मणः फलसंबंध
मात्रविधाने लाघवात्। उद्भिदा यजेतेत्यत्र अनुवचनांतराभावेनागत्या तदाश्रयणं। न च सोमेन यजेतेत्यत्रापि कर्मस्वरूपे गुणे च विधीयमाने वाक्यभे
दस्या दिति वाच्यं। श्रूयमाणविधिना गुणस्याविधेयत्वात्। विशेषणविधेरार्थिकत्वात्। सर्वत्र हि विशिष्टविधौ विशेषणविधिरार्थिकः। ज्योतिष्टो
मेनेत्यस्योत्पत्तिविधित्वे कर्मस्वरूपं फलसंबंधश्चेति श्रूयमाणेनैव विधिना विधातव्यमिति द्वयोर्गौरवलक्षणो वाक्यभेदः। यथाहुः। श्रौतव्यापा
रनानात्वे शाब्दानामतिगौरवं। एको ह्यवसितानां तु नार्थाक्षेपो विरुध्यत इति। न च सोमेन यजेतेत्यस्य उत्पत्तिविधित्वे यद्यपि न वाक्यभेदस्तथा
पि मत्वर्थलक्षणा स्यादेवेति वाच्यं। तस्याः स्वीक्रियमाणत्वात्। लक्षणातो वाक्यभेदस्य जघन्यत्वात्। लक्षणा हि पददोषो वाक्यभेदस्तु वाक्यदो
षः। पदवाक्यदोषयोर्मध्ये पद एव दोषकल्पनाया उचितत्वात्। गुणत्वन्याय्यकल्पनेति न्यायात्। अत एव जातपुत्रः कृष्णकेशोऽग्नीनादधी
तेत्यत्राधानानुवादेन जातपुत्रत्वकृष्णकेशत्वविधाने वाक्यभेदा त्पदाभ्यामवस्थाविशेषो लक्ष्यत इत्युक्तं। तस्माद्वाक्यभेदप्रसक्तौ ल
क्षणैव स्वीकार्या। तस्मात्सोमेन यजेतेत्ययमेवोत्पत्तिविधिर्न ज्योतिष्टोमेनेत्ययं गौरवलक्षणवाक्यभेदापत्तेः। किं च सोमेन यजेतेत्यत्र या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गविधानेऽश्रुत्यर्थविधानं स्यात्। गुणविधाने तु वाक्यार्थविधानं। तच्चाश्रुत्यर्थविधाने संभवति अयुक्तं। यथाहुः। वाक्यार्थविधिरन्याय्यः श्रुत्यर्थविधिसंभवे इति। वाक्यार्थः पदानां संसर्गः। ज्योतिष्टोमेनेत्यत्रापि फलोद्देशेन यागस्यैव विधानात्। न वाक्यार्थविधानं। तदुत्पत्तिविधित्ववादिनापि तदंगीकाराच्च। तस्माज्ज्योतिष्टोमेनेत्ययमधिकारविधिरेव। अपि च कर्मस्वरूपविधिस्तत्र स्वीकार्यः यत्र कर्मणो रूपमुपलभ्यते। यागस्य चेद्रूपं द्रव्यं देवता च सोमेन यजेतेत्यत्र यद्यपि देवता नोपलभ्यते सोमयागस्याव्यक्तत्वात्। अव्यक्तत्वं च स्वार्थचोदितदेवतारहितत्वं। न तु देवतारहितत्वमात्रं। स्वोत्पत्तिवाक्ये देवतारहितत्वेऽपि ऐंद्रवायवं गृह्णातीत्यादिवाक्यविहितग्रहणदेवतानां सत्वात्। ग्रहणार्थाभिरपि च देवताभिः प्रसंगतो यागोपकारस्य क्रियमाणत्वात्। तथापि द्रव्यमुपलभ्यत एव। तेनापि यागस्वरूपं ज्ञातुं शक्यमेव। ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र न द्रव्यं देवता चाश्रूयते। अतस्तस्योत्पत्तिविधित्वे यागविशेषाज्ञानं यागसामान्यस्य विधेयत्वात्। विशेषस्यैव विधेयत्वादित्याद्युक्तदोषेन स्यात्। अतो नायं कर्मोत्पत्तिविधिः। नन्वेवमपि अग्निहोत्रं जुहोतीत्ययमपि होमोत्पत्तिविधिर्न स्यात्। रूपाश्रवणात्। तच्छ्रवणाच्च दध्ना जुहोतीत्ययमेवोत्पत्तिविधिः स्यात्। तथा चाघाराग्निहोत्राधिकरणविरोधस्तत्र हि अग्निहोत्रं जुहोतीत्यस्योत्पत्तिविधित्वं। दध्ना जुहोतीत्यस्य च गुणविधित्वमुक्तमिति चेत्सत्यं। अ

15

न्या० प्र०

ग्निहोत्रं जुहोतीत्यस्योत्पत्तिविधित्वं। दध्ना जुहोतीत्यस्य च गुणविधित्वमुक्तमिति। अयद्यपि रूपं नोपलभ्यते।। अग्निहोत्रशब्दस्य तत्प्र
ख्यन्यायेन नामधेयत्वात्। तदेतदग्रे वक्ष्यामः। तथापि तस्योत्पत्तिविधित्वं स्वीक्रियते। अन्यथानर्थक्यापत्तेः। दध्ना जुहोतीत्यस्य च नानर्थ
क्यं। गुणविधित्वात्। अतोऽग्निहोत्रं जुहोतीत्ययं कर्मोत्पत्तिविधिरिति युक्तं। ज्योतिष्टोमेनेत्यस्य चानार्थक्यं। अधिकारविधित्वोपपत्तेः। अतः कि
मर्थं संभवति रूपवति वाक्ये कर्मविधाने तदुद्दिष्टे तत्स्वीकार्यं। किं च दध्ना जुहोतीत्यस्य कर्मोत्पत्तिविधित्वे पयसा जुहोतीत्यनेनैव नैतत्कर्मानुवा
देन पयो विधातुं शक्यते।। उत्पत्तिशिष्टद्रव्यावरोधात्। उत्पत्तिशिष्टगुणावरुद्धे हि न गुणान्तरं विधीयते। आकांक्षा उत्पत्तिशिष्टेनैव निरस्तत्वात्।।
अतस्तेनापि विशिष्टं कर्मान्तरं विधेयं। तथा चानेकादृष्टकल्पनागौरवं। अग्निहोत्रं जुहोतीत्यस्य तु उत्पत्तिविधित्वे एतद्वाक्यविहितकर्मणो द्रव्याकां
क्षायां युगपदेव खले कपोतन्यायेन दध्ना जुहोति पयसा जुहोतीत्यादिवाक्यैर्गुणा विधीयन्ते इति नानेकादृष्टकल्पनागौरवं। अतोऽग्निहोत्रं जुहो
तीत्ययमुत्पत्तिविधिः। पयसा जुहोतीत्यादयस्तु गुणविधय इति युक्तं। सोमेन यजेतेत्यत्र तु रूपवति वाक्ये कर्मोत्पत्तिविधाने स्वीक्रियमाणे न किंचि
द्दूषणं। पक्षद्वयेप्येकस्यादृष्टस्य तुल्यत्वात्। तस्माद्युक्तं सोमेन यजेतेत्ययमेवोत्पत्तिविधिः। इत्यलं मे तया विधिनिरूपणया गतप्रसंगाच्चिंतया। प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हृतमनुसरामः॥ ।तत्स्वरूपं विधिः प्रयोजनवंतमप्राप्तमर्थं विधत्ते।सच विधिश्चतुर्विधः॥उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोग- ण
विधिश्चेति।तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः।यथाऽग्निहोत्रं जुहोतीति।उत्पत्तिविधौ कर्मणः करणत्वेनान्वयः।होमेनेष्टं भावयेदि
ति।न तु होमं कुर्यादिति साध्यत्वेन।तथासति साध्यस्य साध्यांतरान्वयायोगेनाधिकारवाक्यावगतफलसंबंधो न स्यात्।करणत्वेन त्वन्वये
होमेनेष्टं भावयेत्किं तदिष्टमित्याकांक्षायां फलविशेषसंबंधो घटते।न चोत्पत्तिविधौ इष्टवाचकपदाभावेन कर्मणा इष्टं भावयेदिति कथं वा
क्यार्थ इति वाच्यं विधिश्रुतेरेव फलबोधकत्वात्।सा च पुरुषार्थे पुरुषं प्रवर्तयंती कर्मणः फलसंबंधमात्रं बोधयति।तस्मादुक्तमुत्पत्तिविधौ
कर्मणः करणत्वेनान्वय इति।अत एवोद्भिदा यजेतेत्यादौ तृतीयांत उद्भित्शब्द उपपद्यते॥उद्भिदा यागेन भावयेदित्यन्वयोपपत्तेः।ये
षामपीष्टसाधनं लिङर्थस्तेषामपि तृतीयांतानां कर्मनामधेयानामन्वयोनुपपन्न एव।न हि संभवति याग इष्टसाधनं उद्भिदेति।तृतीयोपा
त्तस्य कारकस्य लिंगसंख्यान्वयायोग्यस्य क्रिययैवान्वयात्।ननु तथापि अग्निहोत्रं जुहोतीत्यादिषु कर्मोत्पत्तिविधिषु द्वितीयांतानां कर्म
नामधेयानां अन्वयोनुपपन्नः।न हि संभवति होमेन भावयेदग्निहोत्रमिति॥सत्यं।श्रूयमाणा तावद्द्वितीयार्थोस्ति साध्यत्वानुवादो होमस्य हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करणत्वेनान्वयात्।असाधितस्यकरणत्वानुपपत्तेः।तस्याश्चानन्वयोपस्थितौसक्तून्जुहोतीतिवत्तृतीयार्थंलक्षयति।अग्निहोत्रहोमेन
स्वर्गंभावयेदिति।उक्तंपार्थसारथिमिश्रैः।अतश्चद्वितीयांतानांकर्मनामधेयानांअन्वयोनानुपपन्नः।तत्सिद्धंउत्पत्तिविधौकर्मकरण
त्वेनान्वेतीति।अंगसंबंधबोधकोविधिर्विनियोगविधिः।यथादध्नाजुहोतीति।सहितृतीययाप्रतिपन्नांगभावस्यदध्नोहोमसंबंधं
विधत्ते।दध्नाहोमंभावयेदिति।एतस्यविधेःसहकारिभूतानिषट्प्रमाणानि।श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यारूपाणि।एतत्स
हकृतेनविधिनांगत्वंपरोद्देशप्रवृत्तकृतिव्याप्यत्वरूपंपारार्थ्यापरपर्यायंज्ञाप्यते।तत्रनिरपेक्षोरवःश्रुतिः।साचत्रिविधा।विधात्रीविनि अभि॰
योक्त्रीचेति।तत्रविधात्रीलिङाद्यात्मिका।अभिधात्रीव्रीह्यादिश्रुतिः।यस्यशब्दस्यश्रवणादेवसंबंधःप्रतीयतेसाविनियोक्त्री।साचत्रिविधा।
विभक्तिरूपा।एकाभिधानरूपा।एकपदरूपाचेति।तत्रविभक्तिश्रुत्यांगत्वंयथा।व्रीहिभिर्यजेतेतितृतीयाश्रुत्याव्रीहीणांयागांगत्वं।नचो १
त्पत्तिशिष्टपुरोडाशावरुद्धेयागेकथंव्रीहीणामंगत्वमितिवाच्यं।पुरोडाशप्रकृतितयोपपत्तेः।पशोरिवहृदयादिरूपहविःप्रकृतितया
यागांगत्वं।नचसाक्षात्पशोरेवांगत्वंकिन्नस्यादितिवाच्यं।तस्यविशसनात्।अवदीयमानत्वाच्चहृदयादीनां।अवदीयमानंहिहविः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थथापुरोडाशादि। मध्यात्पूर्वार्धाच्चावद्यतीतिवाक्यात्। हृदयादीनिचावदीयमानानिनपशोः। हृदयस्याग्रेऽवद्यत्यथजिह्वाया अथवक्ष
सः इतिवाक्यात्। अतोहृदयादीन्येवहवींषि। पशुस्तुप्रकृतिद्रव्यं। पात्नीवतयागेतुसाक्षात्पशुरेवांगं। तस्यजीवतएवपर्यग्निकृतंपात्नी
वतमुत्सृजंतीत्युत्सर्गविधानात्। यत्रतुविशसनंतत्रपशुःप्रकृतिद्रव्यमितिसिद्धं। एवंव्रीहयोऽपिप्रकृतिद्रव्यंतयायागांगंतृतीयाश्रु
त्येति। आरूण्यस्यापिक्रयांगत्वंतृतीयाश्रुत्या। नचामूर्तस्यतस्यकथंक्रयांगत्वमितिवाच्यं। एकहायनीरूपद्रव्यपरिच्छेदद्वारातदु
पपत्तेः। व्रीहीन्प्रोक्षतीतिप्रोक्षणस्यव्रीह्यंगत्वंद्वितीयाश्रुत्या। तच्चप्रोक्षणंनव्रीहिस्वरूपार्थं। स्वरूपेआनर्थक्यात्। व्रीहिस्वरूपस्य
प्रोक्षणंविनाऽप्यनुपपत्त्यभावात्। किंत्वपूर्वसाधनत्वप्रयुक्तं। यदिव्रीहिषुप्रोक्षणंक्रियतेतदातैर्यागेकृतेऽपूर्वंभवतिनान्यथेति। अतःप्र
करणसहकृतयाद्वितीयाश्रुत्यातंडुलनिष्पत्तिप्रणाड्यायदपूर्वसाधनंतदंगत्वंप्रोक्षणस्योच्यतइति। एवंसर्वेष्वंगेष्वपूर्वप्रयुक्तत्वंवेदि
तव्यं। एवंइमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्तइत्यत्रापिद्वितीयाश्रुत्यामंत्रस्याश्वाभिधान्यंगत्वं। यत्तुवाक्यीयोयंविनियोगइति
तन्न। तथासतिवाक्याल्लिंगस्यबलीयस्त्वेनयावद्वाक्यादश्वाभिधान्यंगत्वंभवतितावल्लिंगाद्रशनामात्रांगत्वमेवस्यात्। स्योनंतेसदनंक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या०प्र०
त्य

रामिघृतस्यैँस्यवसदनांगत्वं॥ श्रौतविनियोगपक्षेतु यावल्लिंगाद्यैर्नामात्वोगत्वं भवति तावद्धुत्या ऐंद्र्या गार्हपत्यमुपतिष्ठते इत्यत्र तृतीयाश्रु
त्या ऐंद्र्या ऋचो गार्हपत्योपस्थानांगत्ववदस्याभिधान्यंगविनियोगः क्रियत इति युक्तं मंत्रस्याभिधान्यंगत्वात् तस्माच्छ्रौत एवायं विनियोगः।
यदाहवनीये जुहोतीत्याहवनीयस्य होमांगत्वं सप्तमीश्रुत्या। एवमन्योपि विभक्तिश्रुत्या विनियोगो ज्ञेयः। पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोः
समानाभिधानश्रुत्या कारकांगत्वं। यजेतेति आख्याताभिहितसंख्याया भावनांगत्वं समानाभिधानश्रुतेरेव। पदश्रुत्या च यागांगत्वं। नचा
मूलीयास्तस्याः कथं यागांगत्वमिति वाच्यं। कर्तृपरिच्छेदद्वारा तदुपपत्तेः। कर्त्ता वाक्षेपलभ्यः आख्यातेन द्विभाव नोच्यते। साच कर्तारं विनानु
पपन्ना तमाक्षिपति। ननु किमित्येवं वर्ण्यते आक्षेपलभ्यः कर्तेति॥ आख्यातवाच्य एव कर्ता किं न स्यात्। आख्यातश्रवणे भावनायाइव कर्तु
रपि प्रतीतेः। नच भावनयैवाक्षेपसंभवे किमिति तद्वाचकत्वं कल्पनीयमिति सांप्रतं। तथा सति आख्यातवाच्यकर्त्रैव भावनाक्षेपसंभवे
तद्वाचकत्वमपि न स्यात् किं च भावनायाः न केवलं कर्त्रैव संबंधः कारकांतरेणापि संबंधात्। अत्र सा न संबंधिनि कर्ता ८०
रूपेण वाक्षिप्येत विशेषाभावात्। कर्ता तु भावनयैव संबंधो न कारकांतरेण। गुणानां च परार्थत्वात् संबंधः श्रूप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वात्स्यादिति न्यायात्। अतः सम्प्रति तिनामाक्षिपेदिति सदा आख्यातवाच्यो भावनात्वाक्षेपलभ्यो वा किं न स्यात्। किं चैवं तृतीयादिवि
भक्तीनामपि करणादिवाचित्वं न स्यात्। तेषामपि कर्तृवदाक्षेपलभ्यसंभवात्। किं च यदि कर्ता न वाच्यः स्यात्कथमेकत्वं तेनान्वियात्। नहि
ख्याक्ष्मशब्देनान्वेति अन्यथा कुठारादिलोपप्रसंगः। किं च देवदत्तः पचतीति सामानाधिकरण्यं न स्यात्। नहि केवलं भावनावाचकस्याख्या
तस्य देवदत्तपदेन सामानाधिकरण्यमुपपद्यते। एकार्थनिष्ठत्वाभावात्। कर्तृवाचकत्वे तूपपद्यत एव। लः कर्मणि चेति व्याकरणस्मृतिवि
रोधस्तु कर्तुरनभिधेयत्वे स्पष्ट एव। किं च कर्तुरनभिधेयत्वे देवदत्तेन पचतीति प्रयोगप्रसंगः। तृतीया हि अनभिहितयोः। कर्तृकरणयोर्वि
हिता। आख्यातेन च कर्ता नाभिहित इति कर्तृवाचिनी तृतीया स्यादेव। कर्तुरभिधाने तु अभिहितत्वादेव तृतीया न प्राप्नोति। तस्या अनभिहितका
रकविभक्तित्वात्। देवदत्तः पचतीति प्रथमा तु प्राप्नोत्येव। प्रथमाया अभिहितकारकविभक्तित्वात्। प्रातिपदिकार्थमात्रवाचित्वाद्वा। न च तदा
प्रातिपदिके नैवार्थस्योक्तत्वात्। प्रथमावैयर्थ्यं लिंगसंख्याप्रतिपत्त्यर्थं तस्या आवश्यकत्वात्। केवलप्रातिपदिकस्य प्रयोगासाधुत्वाच्च। न
तश्च यदि कर्ता न वाच्यः स्याद्देवदत्तेन पचतीति प्रयोगः स्यात्। तस्मादाख्यातवाच्यः कर्तेति सिद्धं इति पूर्वपक्षसंक्षेपः। अत्राहुः। स एव हि र्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वार्थो यः प्रकारांतरेण न लभ्यते। अनन्यलभ्यः शब्दार्थ इति न्यायात्। अत एव गंगापदस्य न तीरमर्थः। लक्षणयैव प्रतिपत्तिसंभवात्। अत एव न वाक्यार्थे शक्तिः। एवं चाख्यातवाच्या भावना कर्त्तारं विनानुपपन्ना तमाक्षिपतीति। आक्षेपादेव कर्त्तुः प्रतिपत्तिसंभवे किमिति तद्वाचकत्वं आख्यातस्य कल्पनीयं। न च विनिगमाविरहः। कृतिमान् हि कर्त्ता स एवं च कृते रेव भावनापरपर्यायाया आकृत्यधिकरणन्यायेनाख्यातवाच्यत्वं संभवेन तद्वतः कर्त्तुर्वाच्यत्वं कल्पनीयं गौरवप्रसंगात्। न च भावना कारकांतरेणापि संबद्धा तद् उज्झित्वा कथं कर्त्तारमेवाक्षिपतीति वाच्यं। सा हि यथा नियमेन कर्त्रा संबद्धा न च तथा करणादिकारकांतरेण तिष्ठतीत्यादिषु तया तदनाक्षेपात्। अतः सा प्रथमं कर्त्तारमेवाक्षिपति। न कारकांतरं। अत एवाख्याताभिहिता संख्या न कारकांतरेण संबध्यते। तस्य च प्रथममनुपस्थितेः। अत एव तरतीत्यादि विभक्तीनां करणादि वाचित्वं। भावनायास्तैः सह नियतसंबंधाभावेन तया तेषां नियमेनानाक्षेपात्। आख्यातश्रवणात्प्रागपि तरतीत्यादिविभक्तिश्रवणे करणादि प्रतीतेर्जायमानत्वाच्च। न च शाब्दी संख्या कथमशाब्देन कर्त्रान्वेतीति वाच्यं। कर्त्तुर्लक्षणयोगीकारात्। यथा च लक्षितं तीरं शाब्देन घोषेणा न्वेति। एवं लक्षितः कर्त्ता एकत्वेनान्वेष्यति। अत एव देवदत्तः पचतीति सामानाधिकरण्यमुपपद्यते। कर्त्तुर्लक्षणयोगीकारात्। न च मुख्ये संभ

११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतिकिमितिलाक्षणिकत्वं स्वीकार्यमिति वाच्यं। अनन्यलभ्यः शब्दार्थ इत्यस्य स्थापितत्वात्। अन्यथा सिंहो देवदत्त इत्यपि सामानाधिकरण्यं मु
ख्यं स्यात्। किंच आख्यातवाच्यः कर्तेति वादिनोपि मते देवदत्तः पचतीति सामानाधिकरण्यं न मुख्यं। तन्मते आख्यातेन तृतीयावत् निष्कृ
ष्टशक्तिमात्ररूपकर्तृकारकाभिधानात्। शक्तिमद्द्रव्यस्याकृत्यधिकरणन्यायेनानभिधानात्। देवदत्तशब्देन च द्रव्यमात्राभिधानात्।
अतश्च भिन्नार्थनिष्ठत्वात् तन्मतेपि न मुख्यं सामानाधिकरण्यं। किंतु लाक्षणिकमेवेति न कश्चिद्विशेषः। न च लः कर्तरि चेति व्याकरणस्मृ
तिबलादाख्यातवाच्यः कर्तेति वाच्यं। नहि वाच्यवाचकभावो व्याकरणस्मृत्यधीनः। तस्य न्यायसहितान्वयव्यतिरेकगम्यत्वात्। भवतु वा स्मृ
तिगम्यस्तथापि नेयं स्मृतिः कर्तुराख्यातवाच्यत्वे प्रमाणं। किंतु कर्तुरेकत्वे एकवचनात्मको लकारः। द्वित्वे द्विवचनात्मकः। बहुत्वे बहुवचना
त्मक इत्यस्मिन्नर्थे प्रमाणं। द्व्येकयोर्द्विवचनैकवचने। बहुषु बहुवचनमिति अनेनास्याः स्मृतेरेकवाक्यत्वात्। यत्तूक्तं कर्तुरनभिधाने देवदत्ते
न पचतीति तृतीयाप्रसंग इति तन्न। तृतीया हि कर्तुः प्रतिपत्त्यर्थं तद्गतसंख्याप्रतिपत्त्यर्थं वा तत्र तु कर्तृभावनाक्षेपादेव लभ्यत इति न तत्र तृ
तीयापेक्षा। तत्संख्या तु आख्यातेनैव प्रतीयत इति न तत्रापि अपेक्षा। यथाहुः। संख्यायां कारके वापि विभक्त्याद्विप्रवर्त्यते। उभयं चात्र तत्सिद्धं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या॰प्र॰

भावनालिङ्‌विभक्तिरिति। यत्र तु नाख्यातेन तद्गता संख्योच्यते तत्र न भवत्येव तृतीया यथा देवदत्तेनोदनः पच्यत इति। तस्मात्कर्तुरनभिधाने किंचि
दूषणमिति अलमतिविस्तरेण। प्रकृतमनुसरामः। तत्सिद्धास्त्रिविधश्श्रुतिविनियोगः। स यं श्रुतिर्लिंगादिभ्यः प्रबलं मानं। लिंगादिषु हि न प्रत्यक्षो विनि
योजकः शब्दोस्ति किंतु कल्प्यः। यावच्च तैर्विनियोजकः शब्दः कल्प्यते तावत्प्रत्यक्षया श्रुत्या विनियोगक्लृप्तत्वात्तेषां कल्पकत्वशक्तिर्विहन्यत इति श्रुतेः
प्राबल्यं। अत एवैंद्र्या गार्हपत्यमुपतिष्ठत इत्यत्र यावल्लिंगादैंद्र्या इंद्रोपस्थानार्थत्वं कल्प्यते। तावत्प्रत्यक्षया श्रुत्या गार्हपत्योपस्थानार्थत्वं क्रियत इति
ऐंद्र्या गार्हपत्योपस्थानांगं। सामर्थ्यं लिंगं। यथाहुः। सामर्थ्यं सर्वभावानां लिंगमित्यभिधीयत इति। तेनांगत्वं यथा बर्हिर्देवसदनं दामीत्यस्य लवनां
गत्वं। स हि लवनं प्रकाशयितुं समर्थः। तच्च लिंगं द्विविधं सामान्यसंबंधबोधकप्रमाणांतरापेक्षं। तदनपेक्षं च। तत्र यदंतरेण यन्न संभवत्येव तस्य तदं
गत्वं। तदनपेक्षं केवलल्लिंगादेव। यथार्थज्ञानस्य कर्मानुष्ठानांगत्वं। न हि ज्ञानमंतरेणानुष्ठानं संभवति। यदंतरेण यत्संभवति तस्य तदर्थत्वं तदपेक्षं यथोक्तमंत्रस्य
लवनांगत्वं। लवनं हि मंत्रं विना उपायांतरेणास्य त्वा कर्तुं शक्यं। अतो मंत्रो न लवनस्वरूपार्थः संभव ति। किंतु अपूर्वसाधनांगभूतलवनप्रकाशनार्थः नी
तत्वं च न सामर्थ्यमात्रादवगम्यते। लवनप्रकाशनमात्रे मंत्रस्य सामर्थ्यात्। अतोऽवश्यं प्रकरणादि सामान्यसंबंधबोधकं स्वीकार्यं दर्शपूर्णमासप्रकरणे हि १
मंत्रस्य पाठादेवमवगम्यते। अनेन मंत्रेण दर्शपूर्णमासापूर्वसंबंधि किंचित्प्रकाश्यत इति। अन्यथा प्रकरणपाठवैयर्थ्यप्रसंगात्। किं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदपूर्वसंबंधिप्रकाशकत्वमित्यपेक्षायां सामर्थ्याद्बर्हिर्लवनमित्यवगम्यते॥ नहि बर्हिःसंस्कारद्वारापूर्वसंबंधीति मंत्रस्य सामर्थ्यात्तदर्थ
त्वे सति नानर्थक्यं प्रसज्यते। तस्माद्बर्हिर्देवसदनं दामीत्यस्य प्रकरणाद्दर्शपूर्णमाससंबंधित्वयावगतस्य सामर्थ्यात्तल्लवनांगत्वं सिद्धं। पूषानु
मंत्रणमंत्राणां तु यागानुमंत्रणसमाख्यया यागसामान्यसंबंधेऽवगते सामर्थ्यात्पूषयागसंबंधोवगम्यते॥ ननु तेषां यावत्समाख्यया पूषया
गेन सामान्यसंबंधोवगम्यते॥ तावत्प्रकरणाद्दर्शपूर्णमासाभ्यामेव सामान्यसंबंधोवगतः॥ समाख्यातस्तस्य बलीयस्त्वात्। अतएव पौरोडा
शिकमिति समाख्याते ब्राह्मणे आम्नातानामपि प्रयाजानां प्रकरणात्सान्नाय्योपांशुयाजांगत्वमपीत्युक्तं। किंच यागानुमंत्रणसमाख्ययापि न
पूषयागेन सामान्यसंबंधोवगम्यते॥ किंतु यागमात्रेण। प्रकरणेन तु दर्शपूर्णमासाभ्यामेव विशेषसंबंधोवगम्यते। अतः प्रकरणाद्दर्शादिति तत्संबंध
स्यैवावगतत्वात्तदर्थत्वमेव तेषां युक्तं। पूषेति शब्दस्य पुष्णातीति व्युत्पत्त्या कथंचिदग्न्याद्यभिधायित्वात्। मैवं। पूषानुमंत्रणमंत्रेषु हि श्रूयमाणो एवम
वगम्यते। पूषाभिधानसमर्थत्वात्। अयं मंत्रस्तत्प्रकाशनार्थ इति लवनमंत्र इव लवनप्रकाशनार्थः। न तत्र प्रकरणाद्यपेक्षा। येन तेषामुपजी
व्यत्वेन प्रबलत्वं स्यात्। प्रकरणात्तु दर्शपूर्णमासार्थत्वे तस्य वाक्यलिंगश्रुतिकल्पकत्वेन वियोजकत्वात्। लिंगस्योपजीव्यत्वेन प्राबल्यं। आतोलिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गात्पूर्वेषप्रकाशनार्थत्वेवगते तन्मात्रप्रकाशनमनर्थकमिति। अत्रपूर्वसाधनपूषप्रकाशनार्थत्वंवक्तव्यं किंतदपूर्वमित्यपेक्षायांयागा
नुमंत्रणसमाख्यागृहीताल्लिंगात्पूषयागापूर्वसंबंधिदेवताप्रकाशनार्थोयमित्यवगम्यते। अतोयद्यपिसमाख्यातःप्रकरणंबलीयस्त
थापितस्यलिंगेनबाधितत्वात्समाख्यायाःदुर्बलायाअपिप्रबललिंगाश्रितत्वेनप्राबल्यात्सैवसामान्यसंबंधेप्रमाणं। दुर्बलस्यापिप्रबलाश्रि
तस्यप्राबल्यात्। अतएवश्रुत्यपेक्षयादुर्बलायाअपिस्मृतेराचमनरूपप्रबलपादार्थाश्रितत्वेनप्राबल्यात्। पदार्थधर्मभूतश्रौतक्रमत्यागेन
वेदकरणानंतरंक्षुतेआचमनमेवकार्यमित्युक्तं। यथाहुः। अत्यंतबलवंतोपिपौरजानपदानराः। दुर्बलैरपिबाध्यंतेपुरुषैःपार्थिवाश्रितैरि
ति। यत्तुपूषेतिशब्दःकथंचिदस्याद्यभिधायीतितन्न। तस्यांदंतकोपिसइत्यादिवाक्यशेषेणवैदिकप्रसिध्याचार्थविशेषरूढत्वात्। रूढेश्चा
वयवार्थ। लोचनसव्यपेक्षात्सयोगाद्बलीयस्त्वात्। अतएववर्षासुरथकारोग्नीनादधीतेत्यत्ररथकारशब्देनसौधन्वनापरपर्यायोवर्णविशेष
उच्यते। रूढेःप्राबल्यात्। नतुरथंकरोतीतियोगेन्योत्पत्त्याद्विजातयोयोगस्यदौर्बल्यादित्युक्तंषष्ठे। तस्माद्युक्तमुक्तंसमाख्ययासामा
न्यसंबंधेवगतेसामर्थ्यात्पूषयागसंबंधःपूषानुमंत्रणमंत्राणामिति। यथाहुः। यागानुमंत्रणानीतिसमाख्याक्रतुयोजिका। तस्याधर्म

१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुरोधेन प्राप्तिस्तद्दैवतेकतावि ति। नास्ति श्रुत्यादिप्रमाणांतरासिद्धसामान्यसंबद्धस्य पदार्थस्य विनियोजकं लिंगमिति। तत्र मंत्रविनियोजकं लिंगं मु
ख्य एवार्थे विनियोजकं न गौणे। मुख्यार्थस्य प्रथममुपस्थितत्वेन तत्रैव विनियोगबुद्धौ पर्यवसन्नायां पुनर्गौणेऽर्थे विनियोगकल्पनायां
गौरवप्रसंगात्॥ अत एव बर्हिर्देवसदनं दामीति मंत्रः सामर्थ्यात् कुशलवनांगं। तेषां मुख्यत्वात्। नोलपराजिलवनांगमित्युक्तं॥ तदिदं
लिंगं वाक्यादिभ्यो बलवत्॥ तेषां हि न साक्षाद्विनियोजकत्वं किंतु श्रुतिं कल्पयित्वा। न चासामर्थ्यस्य श्रुतिं कल्पयित्वा विनियोगकल्पना
संभवतीति सामर्थ्यस्यापि कल्प्यत्वेनोपजीव्यत्वात्। अतस्तैर्यावत्सामर्थ्यं कल्पयित्वा श्रुतिः कल्प्यते तावदेव क्लृप्तेन सामर्थ्येन श्रुतिं
कल्पयित्वा विनियोगः क्रियत इति तस्य प्राबल्यं। अत एव स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामी(ति) यस्य सदनांगत्वं लिंगात्।
न तु वाक्यात् सादनांगत्वं तस्य दौर्बल्यादिति। समभिव्याहारो वाक्यं। समभिव्याहारो नाम साध्यत्वादिवाचकद्वितीयाद्यभावेऽपि वस्तुतः शेषशेषि
णोः सहोच्चारणं। यथा यस्य पर्णमयी जुहूर्भवतीति अत्र हि न द्वितीयादिविभक्तिः श्रूयते। केवलं पर्णजुह्वोः समभिव्याहारमात्रं॥ तस्मादेव
च पर्णताया जुह्वंगत्वं न चानर्थक्यं जुहूशब्देनापूर्वलक्षणात्। तदयं वाक्यार्थः पर्णतया अव्यक्तहविर्धारणद्वारा यदपूर्वसाधनं तद्भावयेदिति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पा०प्र०

एवंचपर्णतयायदिऋतुःक्रियतेतदेवतत्साध्यमपूर्वंभवतिनान्यथेतिगम्यतइतिनपर्णतायावैयर्थ्यं।अवत्तहविर्धारणद्वारेतिचावरूपंवक्तव्यं।
अन्यथास्रुवादिष्वपिपर्णतापत्तेः।साचेयंपर्णताअनारभ्याधीतानसर्वेऋतुषुगच्छतिषु।विकृतिषुचोदकेनापिप्राप्तिसंभवेनद्विरुक्तत्वाप
त्तेः॥किंतुप्रकृतिषुतदुक्तं।प्रकृतौवाद्विरुक्तत्वादिति।अत्रविकृतिर्यत्रांगानिरहितातिसाप्रकृतिरितिनप्रकृतिशब्देनविवक्षितं।गृहमेधी
येपर्णताया।अप्राप्तिप्रसंगात्।नहिगृहमेधीयात्काचनविकृतिरंगानिरहितातिमानाभावात्॥किंतुचोदकाद्यत्रांगाप्राप्तिस्तत्कर्मप्र
कृतिशब्देनविवक्षितं॥यथादर्शपूर्णमासौ॥ ॥तत्रहिनचोदकादंगप्राप्तिः।प्रकरणपठितैरेवांगैर्नैराकांक्ष्यात्।गृहमेधीयादिष्व
पिनचोदकादंगप्राप्तिः।क्लृप्तोपकारैरेवाज्यभागादिभिर्नैराकांक्ष्यात्॥अतोयत्रचोदकाप्रवृत्तिस्तत्रानारभ्याधीतानांनिवेशः।साप्तदश्यं
त्वनारभ्याधीतमपिनप्रकृतौगच्छति।प्रकृतेःपांचदश्यावरोधात्।किंतुविकृतिषुगच्छति॥तत्रापिनसर्वासुगच्छति।चोदकप्राप्तपांचदश्यबा
धप्रसंगात्।किंतुप्रत्यक्षश्रुतसाप्तदश्यास्कमित्रविंदादिषुगच्छति॥यथाहुः।एवंचप्रकृतावेतत्पांचदश्यंप्रतिष्ठितं॥विकृतौचनयत्रास्ति
साप्तदश्यपुनःश्रुतिरिति।नचवाक्यवैयर्थ्यं।अनारभ्याधीतस्यैवसाप्तदश्यस्यमित्रविंदादिप्रकरणस्थेनवाक्येनोपसंहारात्।उप

१४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संहारो नाम सामान्यप्राप्तस्य विशेषे नियमनं॥ यथाहुः। सामान्यविधिरस्पष्टः संह्रियेत विशेषतस्त्विति। तत्रानारभ्ये। विधिः सामान्यविधिः। मित्रविंदादिप्रकरणस्थस्तु विशेषविधिरित्यास्तां तावत्। प्रकृतमनुसरामः। तत्सिद्धं वाक्यादंगत्वं। तदिदं वाक्यं प्रकरणाद्बलीयः। प्रकरणं। न साक्षाद्विनियोजकं। तद्धि आकांक्षारूपं। न चाकांक्षा स्वयं प्रमाणं॥ किंतु साकांक्षं वाक्यं दृष्ट्वा भवत्येतादृशी मतिः। नूनमिदं कांक्षं केनचिद्वाक्येनैकवाक्यभूतमिति। ततश्चाकांक्षारूपं प्रकरणं वाक्यस्य वाक्यांतरैकवाक्यत्वे प्रमाणं। एवं यावत्प्रकरणं वाक्यं कल्पयित्वा विनियोजकं भवति तावद्वाक्यं लिंगश्रुती कल्पयित्वा विनियोजकं भवतीति प्रकरणाद्वाक्यं बलीयः। अत एवेंद्राग्नी इदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्रातामित्यत्रेंद्राग्नीपदस्य लिंगाद्दर्शांगत्वे सिद्धे इदं हविरित्यादेरपि तदेकवाक्यत्वाद्दर्शांगत्वं॥ ननु प्रकरणाद्दर्शपूर्णमासांगत्वं। प्रकरणाद्वाक्यस्य बलीयस्त्वादिति। उभयाकांक्षा प्रकरणं यथा प्रयाजादिषु। समिधो यजतीत्यत्र हि दृष्टविशेषस्यानिर्देशात्समिधा यागेन भावयेत्किमिति अस्योपकार्यमित्याकांक्षा। दर्शपूर्णमासवाक्येपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्कथमित्यस्त्युपकारकाकांक्षा। तत उभयाकांक्षया प्रयाजानां दर्शपूर्णमासांगत्वं सिध्यति। ननु यदि प्रयाजादिवाक्ये दृष्टविशेषो न श्रूयते तर्हि विश्वजिन्न्यायेन स्वर्गः फलं कल्प्यतां। विश्वजिदधिकर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या०प्र०

णेविश्वजितायजेतेत्यत्रफलस्याश्रवणात्।फलमंतरेणचविधिश्रुतेरनुपपत्तेरवश्यंफलंकल्पयितव्यं।सर्वाभिलषितत्वेनस्वर्गःफलमित्युक्तं।त
दुक्तं।सःस्वर्गःस्यात्सर्वान्प्रत्यविशिष्टत्वादिति।रात्रिसत्रन्यायेनवार्थिकंफलंकल्प्यतां।रात्रिसत्राधिकरणेहिप्रतितिष्ठंतिहवायएतारात्रीरुपयंती
तितत्रविध्युद्देशेफलाश्रवणात्।फलमंतरेणचविधिश्रुतेरनुपपत्तेरवश्यंफलंकल्पयितव्यं।।अर्थवादिकंप्रतिष्ठारूपंफलमित्युक्तं।।विश्वजि
दधिकरणन्यायेनानुपस्थितस्वर्गकल्पनेतस्यप्रकृतसंबंधकल्पनेगौरवात्।।अर्थवादोपस्थापितस्यैवप्रकृतफलत्वकल्पनेलाघवात्।तदुक्तं।फल
मात्रेयोनिर्देशादश्रुतौह्यनुमानंस्यात्।इतितस्माद्विश्वजिन्न्यायेनरात्रिसत्रन्यायेनवास्वतंत्रफलार्थत्वेसंभवतिसतिकिमितिदर्शपूर्णमासां
गत्वंस्वीक्रियतइतिचेन्नैवं।स्वतंत्रफलार्थत्वेन्यतराकांक्षयासंबंधःस्यात्।नह्यत्रफलस्यसाधनाकांक्षास्ति।श्रूयमाणंहिफलंसाधनमाकांक्षति।न्वा
त्रतत्श्रूयतेएवंफलस्याकांक्षाभावात्।केवलंकिंभावयेदितिप्रयाजानांभाव्याकांक्षयैवस्वतंत्रफलार्थत्वंस्यात्।दर्शपूर्णमासार्थत्वेतस्याकांक्षाप्र
माणं।प्रयाजाद्यैर्नाभाव्याकांक्षायाइतरत्रकथंभावाकांक्षायाःसत्वात्।अन्यतराकांक्षायाश्चोभयाकांक्षाबलीयसीतिवक्ष्यते।ततश्चदर्शपूर्णमासा ११
र्थत्वमेवयुक्तंनस्वतंत्रफलार्थत्वमिति।तदुक्तं।द्रव्यसंस्कारकर्मसुपरार्थत्वात्फलश्रुतिरर्थवादःस्यात्इति।अत्रद्रव्येफलश्रुतिर्यस्यपर्णमयीजु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मेणि फलश्रुतिः वर्मेवाएतद्यजमानस्य क्रियते
दृर्भवति न पापं श्लोकं शृणोतीत्येवमाद्या। संस्कारे फलश्रुतिर्यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृंक्त इत्येवमाद्या। कर्मणि फलश्रुतिः वर्मेवाएतद्यजमानस्य क्रियते
दृर्भवति न पापं श्लोकं शृणोतीत्येवमाद्या। संस्कारे फलश्रुतिर्यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्त इत्येवमाद्या। कर्मणि फलश्रुतिः। तावत्। तदिदं प्रकरणं क्रियायाए
यत्वे याजा अनुयाजा इत्येतदित्येवमाद्या॥ कर्मपदं चारादुपकारककर्मपरं। संस्कारकर्मणः पृथक्संकीर्तनादित्यास्तां तावत्। तदिदं प्रकरणं क्रियायाः
वविनियोजकं। न द्रव्यगुणयोस्तयोस्तु क्रियायोगाद्विनियोजकं। कुत इति चेच्छृणु। यजेत स्वर्गकाम इत्यादौ आख्यातांशेनार्थीभावनाभिधीयते। भा
वयेदिति। सा चांशत्रयमपेक्षते। किं भावयेत्केन भावयेत्कथं भावयेदिति। तत्र भाव्याकांक्षायां षष्ठाद्यन्यायेन स्वर्गे भाव्यतयान्वेति। स्वर्गं भावये
दिति। करणाकांक्षायां समानपदोपात्तो यागो भावार्थाधिकरणन्यायेन करणतयान्वेति। यागेन स्वर्गं भावयेदिति। ततः कथमिति कथंभावकांक्षाजा
यते तस्यां चाकांक्षायां यत्सन्निधौ पठितं अश्रूयमाणफलं क्रियाजातं तदेवोपकार्योकांक्षयाइतिकर्तव्यतात्वेनान्वयमनुभवितुं योग्यं। क्रियाया
एव लोके कथंभावाकांक्षायामन्वयदर्शनात्। नहि कुठारेण छिंद्यात्कथमित्याकांक्षायां हस्त इति केवलमुच्चार्यमाणो हस्तोन्वयं प्राप्नोति। किं तर्हि
हस्तेनोद्यम्य निपात्येत्युच्चार्यमाणे उद्यमननिपातने एव हस्तोपितद्वारेणैवान्वयं प्राप्नोतीति सार्वजनीनमेतत्। किंच कथंभावाकांक्षा नाम करण
गतप्रकाराकांक्षा। थमुः प्रकारवाचित्वात्। सामान्यस्य च भेदको विशेषः प्रकारः। सामान्यं च क्रियारूपमेवाख्यातेनोच्यते। यजेत स्वर्गकाम इत्यत्र

(३)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि त्रयमर्थः। यागेन तथा कर्तव्यं यथा स्वर्गो भवतीति। क्रियासामान्यस्य च विशेषः क्रियैव भवति। न हि ब्राह्मणविशेषः परिव्राजकादिरब्राह्मणो भवति।
एवं च करणगतं क्रियाविशेषाकांक्षापरं नामधेयं कथंभावाकांक्षायां क्रियैवान्वेतीत्युक्तं। स च करणगतः क्रियाविशेषोऽन्वाधानादिब्राह्मण
तर्पणान्तः क्रियारूप एवेति युक्तं तस्य प्रकरणेन ग्रहणं। तस्य च करणांगत्वं तदुपकारकत्वमेव। तेन विनाऽभोगापूर्वोत्पत्त्यनुपपत्तेः। न ह्यपूर्वस्य मन्निने
पतनव्यतिरेकेण कुठारेण द्वैधीभावो जन्यते। तत्सिद्धं कथंभावाकांक्षायां क्रियैवान्वेतीति। अत एव द्रव्यदेवतयोर्योगसंपादनद्वारान्वयः सां
प्रदायिकैरुक्तः। विकृतौ च कथंभावाकांक्षायां उपकारसंपादनमतिदिश्यत इत्युक्तं। यदि च कथंभावाकांक्षायां सिद्धं वस्त्वन्वययोग्यं स्या
त्। तदा संपादनपर्यन्तं धावनं ग्रंथकाराणामनर्थकं स्यात्। अत्रश्च क्रियाया एवेति कर्तव्यतात्वं कथंभावाकांक्षागृहीतस्येति कर्तव्यतात्वात्।
इतिशब्दस्य प्रकारवाचित्वात्। कर्तव्यस्य इति प्रकार इतिकर्तव्यता। प्रकारश्च सामान्यस्य भेदको विशेष इत्युक्तं। कर्तव्यस्य च विशेषः कर्तव्य एव
भवतीति न सिद्धस्य वस्तुन इतिकर्तव्यतात्वं। किंतु क्रियाया एव। सिद्धस्य तु द्रव्यादेः केवलमंगत्वं तदपि क्रत्वादिनानुप्रकरणात्। यथाहुः। नवा
तत्क्रियायोगाद्वे वाक्योपकल्पितात्। गुणद्रव्येकथंभावे ग्रहं तिप्रहत्ताः क्रियाः इति। अत एव बर्हिर्देवसदनं दामीत्यादिमंत्रस्य लिंगाद् अंगत्वमुक्तं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नप्रकरणात्। अर्थवादाधिकरणपूर्वपक्षसमाप्तौ राणके कश्चिद्द्रव्यस्य इति कर्तव्यताऽभिप्रायं द्रष्टव्यं। बहुग्रंथस्वरसादुक्तयुक्तेश्चेति। नत्वि
धं प्रकरणं क्रियाया एव विनियोजकमिति। तच्च प्रकरणं द्विविधं महाप्रकरणं अवांतरप्रकरणं चेति। तत्र फलभावनायाः प्रकरणं महाप्रकरणं।
तच्च प्रयाजानां ग्राहकं। तच्च प्रकृतावेव। यत्र समग्रांगोपदेशः सा प्रकृतिः। यथा दर्शपूर्णमासादिः। तत्र च उभयाकांक्षारूपं प्रकरणं संभवति।
क्षो आकांक्षानुपशमात्। विकृतौ प्रकरणं न संभवति। यत्र न समग्रांगोपदेशः सा विकृतिः। यथा सौर्यादिः। तत्र च यान्यपूर्वाण्यंगानि पठ्यंते उपहो
मादीनि। तेषां न प्रकरणं विनियोजकं। तत्र यद्यपि तेषां किं भावयेदिति अस्त्याकांक्षा तथापि प्रधानस्य न कथंभावाकांक्षास्ति। प्राकृतैरेवांगैर्नि
राकांक्षत्वात्। न च प्राकृतानामंगानामत्रापठितत्वेनाप्रत्यक्षत्वात् विकृतानां तु पठितत्वेन प्रत्यक्षत्वात् तैरेवाकांक्षोपशम इति वाच्यं। तेषां पठितत्वेपि
अकॢप्तोपकारकत्वेन सद्यआकांक्षोपशमने असामर्थ्यात्। प्रकृतानां तु कॢप्तोपकारकत्वेन तच्छमने सामर्थ्यात्। न चात्र तेषां उपस्थापका
भावः उपमितिलक्षणप्रमाणेन तेषामुपस्थितत्वात्। सौर्यवाक्ये हि दृष्टे औषधद्रव्यत्वेन एकदेवत्यत्वेन च सादृश्येनाग्नेयवाक्यमुपमीयते
गवयदर्शनात् गोरूपमानवत्। तस्मिंश्चोपमिते तेन तदर्थो ज्ञायते। अंशत्रयभावना च तदर्था उपस्थाप्यते। तत्र सौर्यवाक्ये भावनायां भाव्यक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रणयोः सत्वात्। इतिकर्तव्यताकांक्षायां उपकारस्पष्टभावेन आग्नेयेतिकर्तव्यता अतिदिश्यते। सौर्ययागेन ब्रह्मवर्चसं भावयेदाग्ने
यवदिति। तथाच तयैवाकांक्षोपशमान्न विकृते। प्रकरणमस्ति। अन्यतराकांक्षारूपस्थानादेव चापूर्वांगग्रहणं। नच प्राकृतांगग्रहणमेव विकृतौ
प्रकरणात्किं न स्यादिति वाच्यं। तेषामपि प्रकृत्युपकारकतया कांक्षोपशमात्। ननु प्राकृतानामंगानामाकांक्षाभावे तेषां विकृति संबंधः।
केवलं स्थानात्स्यात्। अपूर्वाणां त्वाकांक्षासत्वाद्विकृतेरप्याकांक्षावत्वात्तेषां तत्संबंधः प्रकरणात्स्यात्। प्रकरणं च स्थानाज्झटिति विनियो
जकमित्यपूर्वाणामेव प्रथमं संबंधः स्यान्न प्राकृतानामिति उच्यते। सत्यं प्रकरणं झटिति विनियोजकं तथापि प्रमाणबलाबलात् प्रमेयब
लाबलस्य ज्यायस्त्वात्। उक्तविधयोपस्थितानां प्राकृतानामेव संबंधो युक्तः। क्लृप्तोपकारकत्वात्। न वैकृतानां कल्प्योपकारत्वात्। वि
कृतेश्चोपकारकपदार्थाकांक्षा न पदार्थमात्राणामिति युक्तः प्रथमं प्राकृतांगसंबंधः। तस्मान्न विकृतौ प्रकरणं विनियोजकं। यत्तु वि
कृतौ प्राकृतांगानुवादेन विधीयते। यथौदुंबरो यूपो भवतीति यूपानुवादेन औदुंबरत्वं तत्प्रकरणात् गृह्यते। ननु न तत्प्रकरणात् गृह्यते।

(१७)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रियात्वात्। क्रियाया एव प्रकरणग्राह्यत्वादिति चेत्सत्यं। तथापि तु तावद्विधीयमानस्यौदुंबरत्वस्य अस्येत्याकांक्षा किंभावयेदिति। न च यूपानुवादेन तस्य विधीयमानत्वाद्यूपस्य चादृष्टरूपत्वाच्चैनैवौदुंबरत्वस्य नैराकांक्ष्यं। आहवनीये नेवाधानस्येति वाच्यं। यूपस्य केवलादृष्टरूपत्वाभावात्। तस्य हि तद्रूपत्वे खादिरत्वादिकं केवलादृष्टार्थं स्यात्। न च तत्संभवति। तथा सति खादिराभावे प्रतिनिधित्वेन कदरोपादानं न स्यात्। अदृष्टार्थस्य प्रतिनिध्यभावात्। नहि खदिरजन्यमदृष्टं कदरेण क्रियत इत्यत्र प्रमाणमस्ति। अत एव नादृष्टार्थानां प्रतिनिधिः। तदुक्तं। न देवताग्निशब्दक्रियमन्यार्थत्वादिति। प्रतिनिधित्वेन चोपादानं कदरादेरुक्तं यथेषु। तस्मान्न यूपस्य केवलादृष्टरूपत्वं। अपि तु दृष्टादृष्टसंस्कारगणो यूप इति सो प्रदायिकाः। एवं च औदुंबरत्वस्य न यूपमात्रेण नैराकांक्ष्यं। दृष्टसंस्कारस्य प्रकारान्तरेणापि संभवात्। अतश्चास्यौदुंबरत्वस्याकांक्षा। विहितेऽस्यास्ति कथंभावाकांक्षा। सा च तदा शाम्यति। यदोपकारास्तत्स्थत्वभावेन च पदार्थो अन्वीयंते। न तूपकारमात्रान्वयेन शाम्यति। अतश्च यथेंद्रियभावनायाः करणाकांक्षादध्नः करणत्वेनान्वये जाते सिद्धस्य करणत्वानुपपत्त्या होमस्याश्रयत्वेनान्वयं यावदनुवर्तते। न तु दध्यन्वयमात्रेण निवर्तते। आश्रयत्वेन चगृह्यमाणो होमः करणाकांक्षयैव गृहीत इत्युच्यते। न त्वाश्रयाकांक्षा नाम चतुर्थी अस्ति। एवं विहितेः कथंभावाकांक्षा नोपकारान्वयमात्रेण निवर्तते। उपकारत्वभावेन यावत्पदार्थान्वयमनुवर्तते।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या०प्र०

अतश्च उपकारत्वभावेन गृह्यमाणाः पदार्थाः कथंभावाकांक्षायैव गृह्यन्ते। तत्र प्राकृताः पदार्थाः कथंभावाकांक्षया गृह्यमाणा
अपि न प्रकरणग्राह्याः प्रकृत्युपकारकतया तेषामाकांक्षाभावात्। औदुंबरत्वादयस्तु अन्यानुपकारकतया साकांक्षाः प्रकृतिनियोज
न यूपपृष्ठभावेन यावत्खादिरत्वमायाति तावद्विधीयंत इति युक्तं तेषां प्रकरणग्रहणं उभयाकांक्षासत्वात्। यदि हि यूपपृष्ठभावेन खादिर
त्वं विहितं स्यात् तदा विकृतेराकांक्षाभावात् औदुंबरत्वं न प्रकरणग्राह्यं स्यान्न चैतदस्ति। चोदकस्य खादिरत्वाविषयत्वात्। ननु यदि यावत्खादि
रत्वमायाति तावदेवौदुंबरत्वं विधीयते। तदा तेन खादिरत्वबाधः अप्राप्तबाधः स्यात्। तार्तीयबाधवत्। तथा हि। बाधो द्विविधः। अप्राप्तबाधः।
प्राप्तबाधश्चेति। तत्र तार्तीयो बाधः अप्राप्तबाधः। तत्र हि यावद्दुर्बलेन प्रमाणेन विनियोगः। कर्तुमारभ्यते तावदेव प्रबलेन प्रमाणेन विनियो
गः क्रियत इति तद्बोधितेन इतरबाधो अप्राप्तबाधः। दुर्बलप्रमाणस्याप्रवृत्तत्वात्। प्रकृतस्य तु अंगस्य विकृतौ चोदकप्राप्तस्य प्रत्याम्नानात्
त्। अर्थलोपात् प्रतिषेधाद्वा यो बाधः स प्राप्तबाधः। यथा प्राकृतानां कुशानां प्रतिकृष्णशराम्नानात्। यथा वावघातस्य कृष्णलेषु वैतुष्यरू
पप्रयोजनलोपात्। तथा वापि ऋत्विग्वरणस्य न होतारं वृणीत इति प्रतिषेधात्। औदुंबरत्वेन च खादिरत्वे बाधः प्राप्तबाध एव वक्तव्यः।। १८
शरकुशान्यायेन। चोदकस्य च खादिरत्वाविषयत्वे प्राप्त्यभावात् तदनुपपत्तिः स्यादिति। उच्यते। तार्तीयप्रमाणविनियुक्तेन तरस्य बाध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नं प्रकरणं चुतातीयं तेन तद्धि नियुक्ते औदुंबरत्वे नैतरबाधनमप्राप्तबाध एव। न हि वैकृते न प्राकृतबाधः। प्राप्तबाध एवेति कुल धर्मः। वस्कतस्क
प्राप्तबाध एवायं। न च खादिरत्वस्य चोदकाविषयत्वेन प्राप्त्यभावात्कथं तद्बाधः प्राप्तबाधस्तद्विषयत्वे चातेनैवं नैराकांक्ष्यात्तेनौदुंबरत्वस्य
प्रकरणं विनियोजकं स्यादिति वाच्यं। न हि प्राप्तबाधस्थले चोदकेन पदार्थः प्राप्यते। तथा सति शास्त्रप्राप्तत्वेन बाधो न स्यात्। किं तर्हि तान्
वपदार्थोन्वस्कतः प्रापयति। ये विकृतौ न बाध्यंते ते च बाध्यंते तेच पदार्थाः प्रकृतिवत्स्वद्वेन प्राप्यं तद्दति भवति पुरुषस्य भ्रांतिः। यथा प्रकृ
तौ कृतं तथा विकृतौ कर्तव्यमिति सर्वे प्राकृताः पदार्थाः कर्तव्या इति। अतश्च भ्रांतिप्राप्ताः खादिरत्वादयः शास्त्रप्रतिपन्नौदुंबरत्वादिभिर्बाध्यंत
इति तद्बाधः प्राप्तबाधः। न च भ्रांतिप्रतिपन्नेन वैधी आकांक्षा निवर्तयितुं शक्यते। तस्मादुक्तमुभयाकांक्षारूपप्रकरणसंभवाद्विकृतौ
प्राकृतांगानुवादेन विधीयमानानामौदुंबरत्वादीनां प्रकरणं विनियोजकमिति। एवं पृषदाज्येनानुयाजान्यजतीति प्रकृतानुयाजानुवा
देन विधीयमानं पृषदाज्यमपि प्रकरणाद्विकृत्यंगमिति केचिदार्याः। अन्ये तु समाहुः। पृषदाज्यं हि अनुयाजानुवादेन विधीयते। तत्स्व
रूपे चानर्थक्यप्राप्तौ तेन विकृत्यपूर्वं लक्षयितुं युक्तं विप्रकर्षात्। किंतु दीक्षणीयावाङ्गियमनन्यायेन स्वापूर्वमेव लक्षयितुं युक्तं सन्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्षात्। अत एवोत्पवनादीनां प्रोक्षणाद्यपूर्वप्रयुक्तत्वं तन्त्रे नवमे। अतश्च विधीयमानस्य पृषदाज्यस्य वाक्यप्रतिपन्नेनानुयाजापूर्वेणैव नै
राकांक्ष्यात्। न प्रकरणाद्विकृत्यपूर्वार्थत्वमिति। वयं तु अंगीकृत्यापि विकृत्यर्थत्वं ब्रूमः॥ भवतु वा विकृत्यर्थत्वं तथापि पृषदाज्यस्य न प्रकरणं
विनियोजकं भवतीति। यूपपृष्ठभावेन हि यावत्खादिरत्वमायाति तावदेवौदुंबरत्वविधानात् उभयाकांक्षासंभवात् युक्तः प्रकरणविनियो
गः॥ एवं यावदनुयाजपृष्ठभावेन आज्यमायाति तावदेव यदि पृषदाज्यं विधीयेत तदोभयाकांक्षासंभवात् प्रकरणविनियोगो भवेत्। न त्वेतद
स्ति। न हि पृषदाज्यं नाम द्रव्यान्तरं किंचिदस्ति यदाज्यस्थानापन्नं विधीयेत। औदुंबरत्वमिव खादिरत्वस्थानापन्नं पृषच्छब्दस्य पृषन्म
णिरित्यादौ चित्रताचाचित्वेन दृष्टत्वात्। पृषच्छब्दस्य चित्राज्यवाचित्वात्। अत एव निगदेषु आज्यपानि सेव वक्तव्यं। ननु पृषदाज्यपनि
त्यक्तं। न च यावत्प्राकृतमाज्यमायाति तावदेव चित्राज्यविधानात्। प्रकरणविनियोगसंभव इति वाच्यं। न हि पृषदाज्यशब्देन चित्रतागुणवि
शिष्टमाज्यं विधीयते। विशिष्टविधाने गौरवापत्तेः। किंतु प्राकृताज्यानुवादेन चित्रतागुणमात्रं विधीयते। लोहितोष्णीषा ऋत्विजः प्र
चरंतीतिवत्। तदुक्तं। दशमे चतुर्थचरणे त्येन वा गुणशास्त्रत्वादिति। प्राकृतस्यैवाज्यस्य चित्रतामात्रविधानमिति च शास्त्रदीपिकायां।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं च विकृतेः प्राकृतेनाज्येन कृष्णलोपकारे श्रानुयाजे नैराकांक्ष्ये पश्चाद्विधीयमानस्य चित्रत्वगुणस्योपहोमाद्यपूर्वांगवत्प्रकरणेन विनियोजकं संभवति। यदि।
हि प्राकृतस्य कस्यचित्तद्गुणस्थाने चित्रतागुणो विधीयेत तदा स गुणो यावद्याग्निता वद्धिकृते नैराकांक्ष्याभावात्। चित्रतागुणस्य च तावदेव विधानाद्
भयाकांक्षासंभवात्। प्रकरणविनियोगो भवेत्। न च तादृशः प्राकृतो गुणोऽस्ति। आज्यस्यानुयाजानां चाचित्रतागुण्यात्प्रागेव विधानात्। तस्य च तत्स्थाना
पन्नत्वाभावाच्च। न चाज्यपृष्ठभावेन यावत्प्राकृतं निर्गुणत्वमायाति तावदेवास्य विधानात्प्रकरणं संभवतीति वाच्यं। निर्गुणत्वस्याविहितत्वेन प्राणिकंडूय
नवदनंगत्वात्। विकृतेस्तदाकांक्षाभावात्। ज्योतिष्टोमे दक्षिणादानसमये विहितास्य कृष्णविषाणात्यागस्य द्विरात्रादिषु चोदकप्राप्तस्य प्रथ
मेऽह्नि अननुष्ठानमुत्तरेऽह्नि दक्षिणादानपूर्वकालीनैः पदार्थैः कृष्णविषाणाकंडूयनस्पर्शास्त्वविहितत्वेनापेक्षणीयत्वात्। ज्योतिष्टोमे च दक्षि
णादानोत्तरकालीनं पाणिकंडूयनं दृष्टमपि द्विरात्रादिषु प्रथमेऽह्नि अनुष्ठीयमानैर्दक्षिणादानोत्तरकालीनैः पदार्थैः नापेक्ष्यते तस्य प्रकृतावर्थसि
द्धत्वेनाशास्त्रीयत्वादिति। एवं निर्गुणत्वस्याविहितत्वेन विकृतेस्तदपेक्षा नास्तीति। तस्मादुभयाकांक्षाया असंभवात्। पृषदाज्ये न प्रकरणावि
नियोगः संभवतीत्यलमतिविस्तरेण। तत्सिद्धं म[?]प्रकरणं प्रकृतावेव विनियोजकं। विकृतौ तु यत्प्राकृतदृष्टार्थांगानुवादेन विधीयते तस्य विनियो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या॰प्र॰

जकं न तु केवलं विधीयमानस्यापूर्वांगस्येति। यस्तु विकृतावपि प्राकृतधर्मानुवादेन विधीयमानयोर्धर्मयोरंतराले ऽपूर्वमप्यंगं केवलं पठ्यते। तद
पि प्रकरणेन विनियुज्यते। यद्यपि विकृतेः कथंभावाकांक्षा प्राकृतैरेवांगैः शाम्यति तथापि यत्र प्राकृतांगानुवादेन धर्मविधानं तत्र तद्विधानं यावन्न निवर्त
ते। अतो विकृतेराकांक्षावलादंतराले विहितस्यापि अपूर्वस्यांगस्य भाव्याकांक्षासत्वात् युक्तं तस्य प्रकरणादिकृत्यर्थत्वं। यथा आमनहोमेषु ते हि प्राकृतां
गानुवादेन विधीयमानयोर्धर्मयोरंतराले विधीयंत इत्युक्तं तत्र रत्नादाविव्यास्तां तावत्। फलभावनायाश्चांतराले यदंगभावनायाः प्रकरणं तदवांतरप्रक
रणं। तच्चाभिक्रमणादीनां प्रयाजादिषु विनियोजकं तच्च संदंशेन ज्ञायते। तदभावे ऽविशेषात्सर्वेषां फलभावनाकथंभावेन ग्रहणात्। संदंशो नामैकांगानुवादे
न विधीयमानयोरंगयोरंतराले विहितत्वं। यथाभिक्रमणे। तद्धि समानयत उपभृत इत्यादिना प्रयाजानुवादेन किंचिदंगं विधाय विधीयते पश्चादपि प्रयाजानु
वादेन यो वै प्रयाजानां मिथुनं वेदेत्यादिना किंचिदंगं विधीयते। अतः प्रयाजांगमध्ये पठितमभिक्रमणं तदंगं भवति। तत्कथंभावाकांक्षाया आशांतेः।
यथाहुः। परप्रकरणस्थानामंगेष्वित्यादिभिस्त्रिभिः। शांते पुनश्च तैरेव संदंशो न लभ्यत इति। नत्वांगभावनायाः कथंभावाकांक्षाभावात् कथंप्रमाजभा २०
तिवाच्यं वनाकथंभावेनाभिक्रमणं गृह्यत इत्युक्तं। भावनासाम्येन सर्वत्र कथंभावाकांक्षायाः सत्वात्। प्रयाजैरपूर्वकृतत्वाया गोपकारं भावयेदित्यन्वये यो नामनुज्ञा
नाति प्रयाजैरपूर्वकृतं तस्य भवत्येव कथंभावाकांक्षा कथमेभिरपूर्वकृतं भावयेदिति। सा च संदंशपतितैर्वाचनिकैः स्मार्तैश्चाचमनादिभिः शाम्यति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदभावे च स्वरूपनिष्पादनेन दर्वीहोमन्यायेन निवर्तते। दर्वीहोमेषु स्वरूपनिष्पादनातिरिक्तस्तथाव्यापारोऽनुश्रूयते। नाप्यतिदेशेन तत्प्रा
प्तिः। यागीयानां धर्माणां तावन्नातिदेशो यागत्वेन होमत्वेन वैलक्षण्यात्। नापि होमीयानां कस्य होमस्य धर्माः कस्मिन् होमे प्रवर्तेरन्
इति विशेषनिर्णये प्रमाणाभावात्। अतो धर्मप्राप्त्यभावाद्दर्वीहोमे किं भावयेदिति तत्कथमित्याकांक्षा स्वरूपनिष्पादनेनैव शा
म्यति। एवं येष्वंगेषु संदंशाद्यभावस्तत्रोत्पन्नाप्याकांक्षा तेनैव निवर्तते। न तु सर्वथा इति भावः। तस्मादुक्तमभिक्रमणं प्रयाजांगमिति।
तच्चेदमवान्तरप्रकरणं महाप्रकरणाद्बलीयः। संदंशपतितानां धर्माणां केवलमध्याकांक्षायां प्रधानापूर्वोत्पत्त्या प्रयाजापूर्वस्य च टिकपश्चि
तेरिति। प्रकृतमनुसरामः॥ ॥ तत्सिद्धमुभयविधस्य प्रकरणस्य विनियोजकत्वं। तदिदं स्थानादिप्रमाणात्प्रबलं। यत्र हि स्थानादं
गत्वं तत्रान्यतरस्य प्रकारान्तरेण निराकांक्षत्वं। न च साकांक्षत्वं निराकांक्षेण संबंधुं योग्यं विनाकांक्षोत्थापनेन। अतश्चान्यतरा
कांक्षया यावदुभयाकांक्षारूपप्रकरणकल्पनाद्वारा वाक्यादिकं कल्पयितुमारभ्यते तावत्प्रकरणेन वाक्यादिकं कल्पयित्वा विनियो
गः क्रियत इति स्थानात्प्रकरणस्य बलीयस्त्वं। अत एव विदेवनादयो धर्मा अभिषेचनीयसन्निधौ पठिता अपि नाभिषेचनी

41

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यांगं। तेषां तदंगत्वं तावत्स्थानाद्भवेत्। नतु प्रकरणात्। अभिषेचनीयस्य प्राप्य क्रत्वोदनाचोदितत्वेन ज्योतिष्टोमविकारत्वात् प्राकृतैरेव धर्मैर्निराकांक्षत्वात्। किंतु प्रकरणाद्राजसूयांगं। ननु राजसूयेन स्वाराज्यकामो यजेतेत्यत्र राजसूयशब्दस्तावन्नामधेयत्वादाख्यातपरतंत्रो यत्राख्यातं वर्तते तत्रैव वर्तते। न च दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र यथा दर्शपूर्णमासपदं नामधेयमपि नाख्यातपरतंत्रं। तत्र हि यजेतेत्याख्यातमविशेषात्सर्वानेव प्राकृतानाग्नेयादीन्प्रयाजादींश्चाभिधत्ते। तुसमर्थं दर्शपूर्णमासपदं त्वाग्नेयादीनेव वदति न सर्वान्। अतश्च न तदाख्यातपरतंत्रं। तथा राजसूयपदमपि किं न स्यादिति वाच्यं। प्रसिद्धेन रूढिपदेनाप्रसिद्धं नीयते। यथा कुशाः पदमन्नासंते दिग्धं प्रविध्येरपृथक्कुश्कृति। निर्णीयते निरूढं तु नस्वार्थो दृपनीयते इति। दर्शपूर्णमासपदं च कालनिमित्तं तद्योगश्चाग्नेयादिषूत्पत्तिवाक्येष्वगतमतस्तद्वाचित्वेन दर्शपूर्णमासपदं प्रसिद्धं। न चाग्नेयादीनां बहुत्वात् द्विवचनान्तत्वमस्यानुपपन्नमिति वाच्यं विद्वद्वाक्यद्वयसिद्धसमुदायद्वयाभिप्रायेण तदुपपत्तेः। एवं च दर्शपूर्णमासपदस्याग्नेयादिवाचित्वेन निर्णीते यजेतेत्याख्यातमपि तदेव वदति। न हि गुणोक्तौ स्वार्थत्यागो भवति। राजसूयपदं

य एवं विद्वान्पौर्णमासीं यजते य एवं विद्वानमावास्यां यजते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तु अनिर्णितार्थे। अतस्तदाख्यातपरतंत्रमेव। तच्चाविशेषात्सर्वेष्विष्टिपशुसोमेषु विद्यते। तत्तंत्रत्वाद्राजसूयपदमपि तान्नेव वदति।
न च राजसूयशब्दस्य राजा सूयते यत्रेति व्युत्पत्त्या सोमाभिषवनिमित्तत्वात्। तत्रैस्य च सोममभिषुणोतीति वाक्येन सोमया
गेऽवगतत्वात्। तद्वाच्यत्वमेव न इष्टिपशुवाच्यत्वमिति वाच्यं। न ह्यभिषेचनीयादिसोमयोगेषु अभिषवः प्रत्यक्षेन वाक्येन चोदि
तोस्ति। तद्वाक्यस्य ज्योतिष्टोमसत्वात्। अतिदेशात्तत्संबंधोऽवगत इति चेन्न। अतिदेशस्य फलसंबंधोत्तरकालीनत्वेन राज
सूयेन स्वाराज्यकामो यजेतेत्येतद्वाक्यार्थावगत्युत्तरकालीनत्वात्। अनेन हि वाक्येन फलसंबंधे बोधिते पश्चात्कथंभावाकां
क्षामतिदेशकल्पनात्॥ अतस्ततः प्रागेवैतद्वाक्यार्थो वर्णनीयस्तदा चाभिषवस्यानवगतत्वात्। राजसूयपदमप्यप्रसिद्धार्थमेवा। अ
त एव राजसूयपदमव्यक्तस्तत्र अश्वकर्णशब्दवदित्युक्तं सांप्रदायिकैः। एवं चाप्रसिद्धार्थत्वेनाख्यातपरतंत्रत्वात्। राजसूयपदेने
ष्टिपशुसोमयागा उच्यंते। ते च नैस्तैः प्राकृतैर्धर्मैर्निराकांक्षा इति न प्रकरणं विदेवनादीनां राजसूये विनियोजकं। उभयाकांक्षाया
अभावात्। न च प्रातिस्विकरूपैर्नैराकांक्ष्येपि न राजसूयत्वेन रूपेण नैराकांक्ष्यमिति वाच्यं। आकांक्षा द्वये प्रमाणाभावात्॥ किंच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रातिस्विकरूपेणैकथंभावाकांक्षा। सापि फलसंबंधोत्तरकालं। सा च राजसूयत्वेन। न तु प्रातिस्विकरूपेण। राजसूयत्वेन च फलं
संबंधे उत्पन्नायाः कथंभावाकांक्षायाः विदेवनादिभिः शांतिरिति दशाकल्पनमेव न स्यात्। यदि हि सामान्यरूपेण प्रातिस्विकरू
पेण च फलसंबंधविधायिवाक्यद्वयं भवेत्। तदा युज्येताकांक्षाद्वयानुसारेण विदेवनादीनामातिदेशिकानां चांगानां संबंधो न तु द
स्ति। तस्मात्प्राकृतधर्मैर्नैराकांक्ष्यात् विदेवनादीनां न प्रकरणं विनियोजकमिति चेत्सत्यं। अत एव सांप्रदायिकैर्विदेवनादीनां सं
दंशो दर्शितः। राजसूयत्वपुरस्कारेण ये धर्मा विधीयंते राजसूयाय चोदनात्पुनातीत्येवमादयः तन्मध्ये विदेवनादयः पठ्यंते।
अतस्ते सर्वे राजसूयांगं। प्रयाजानुवादेन विधीयमानधर्ममध्ये पठितप्रयाजांगाभिक्रमणवत्। तस्मादुक्तमुक्तं विदेवनादीनां
प्रकरणाद्राजसूयांगत्वमिति। तत्सिद्धं प्रकरणस्य स्थानाद्बलीयस्त्वमिति। देशसामान्यं स्थानं। तच्च द्विविधं। पाठसादेश्यं
अनुष्ठानसादेश्यं चेति। यथाहुः। तत्क्रमो हि द्विधैवेष्टो देशसामान्यलक्षणः।। पाठानुष्ठानसादेश्याद्विनियोगस्य कारणमिति।
स्थानं क्रमश्चेत्यनर्थांतरं।। पाठसादेश्यमपि द्विविधं। यथासंख्यपाठः सन्निधिपाठश्चेति।। तत्रैंद्राग्नमेकादशकपालं निर्वपेत् वैश्वानरं २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वादशकपालं निर्वपेदित्येवं क्रमविहितेष्टिषु इन्द्राग्नी रोचना दिव इत्यादीनां याज्यानुवाक्यामन्त्राणां यथासंख्यं प्रथमस्य प्रथमं द्वितीयस्य
द्वितीयमित्येवं यो विनियोगः स यथासंख्यं पाठात्। प्रथमपठितमन्त्रस्य हि कैमर्थ्याकांक्षायां प्रथमतो विहितं कर्मैव प्रथममुपतिष्ठते समानदेश
त्वात्। यानि तु कृतान्यंगानि प्राकृतांगानतुनुवादेन विहितानि संदंशापतितानि तेषां विकृत्यर्थत्वं संनिधिपाठात् तेषां हि कैमर्थ्याकांक्षायां
फलवद्विकृत्यपूर्वमेव भाव्यत्वेन संबध्यते। उपस्थितत्वात्। अत एव न तेषु विश्वजिन्न्यायावतारः स्वतंत्रफलार्थत्वे विकृतिसन्निधिपाठादि
नर्थक्यापत्तेश्च। पशुधर्माणामग्नीषोमीयार्थत्वं अनुष्ठानसादेश्यात्॥ औपवसथ्ये ह्यग्नीषोमीयः पशुरनुष्ठीयते तस्मिन्नेव ते धर्माः पठ्यं
ते। अतस्तेषां कैमर्थ्याकांक्षायां अनुष्ठेयत्वेनोपस्थितं पश्वपूर्वमेव भाव्यत्वेन संबध्यते॥ अतो युक्तमनुष्ठानसादेश्यात्तदर्थत्वं तेषां। न च
पाठसादेश्यादेवतात्वं किं न स्यादिति वाच्यं। अग्नीषोमीयस्य पशोः क्रयसंनिधौ पाठात्। न च क्रयसान्निध्यात्तस्य पाठे तदनुष्ठानमपि तत्र
स्यादिति वाच्यं। स एव द्विदेवत्यः पशुरौपवसथ्येह्न्यालभ्य इति वचनात्तदनुपपत्तेः। न च स्थानात्प्रकरणस्य बलीयस्त्वेन पशुधर्माणां
ज्योतिष्टोमार्थत्वमेव किं न स्यादिति वाच्यं। तस्य सोमयागत्वेन पशुधर्मग्रहणेऽयोग्यत्वात्। अत आनर्थक्यप्रतिहतानां विपरीतं बला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बलमिति न्यायात्स्थानात्पशुयागार्थत्वमेव धर्माणां युक्तं। न च तेषां तदर्थत्वं प्रकरणादेव किं न स्यादिति वाच्यं। अग्नीषोमीयकथंभावाकांक्षायाः
क्लृप्तोपकारैः प्राकृतधर्मैरेवोपशांतत्वात्। स हि सान्नाय्ययागप्रकृतिकः उभयोः पशुप्रभवद्रव्यत्वसामान्यात्। तदुक्तं। सान्नाय्यं ता
वत्तत्प्रभवत्वादिति। सान्नाय्यं दधिपयसी तत्र पशुयागः पयोयागप्रकृतिकः साक्षात्पशुप्रभवद्रव्यत्वात्। अतश्चोदकप्राप्तैस्तु धर्मैर्नि
राकांक्षत्वात्पशुयागे धर्माणां प्रकरणं न विनियोजकं किंतु स्थानमेव। तदेवं। निरूपितः संक्षेपतः स्थानविनियोगः। तच्च समाख्यातः प्रबलं।
स्थानविनियोगे हि पदार्थयोर्देशसामान्यलक्षणः संबंधः प्रत्यक्षः। समाख्याविनियोगे तु संबंधो न प्रत्यक्षः। पदार्थयोर्भिन्नदेशत्वा
त्। न च सा संबंधवाचिका। यौगिकानां शब्दानां द्रव्यवाचकत्वेन संबंधावाचकत्वात्। तथा हि। समाख्या संबंधसामान्यवाचिका
स्यात्तद्विशेषवाचिका वा। नाद्यः। तदुक्तौ प्रयोजनाभावात्। सर्वयौगिकशब्दानां पर्यायत्वापत्तेश्च। द्वितीयेपि विशेषसंबंधिनो वाच्यौ। तदंत
रेण संबंधविशेषाभावात्। तत्प्रतिपत्तिमंतरेण तदप्रतिपत्तेश्च। अतश्चाविशेषसंबंधवाचकत्वं समाख्याया वक्तव्यं। तथा च न संबंध
वाचकत्वं। संबंधिप्रतिपत्त्यैव वाक्यार्थप्रतिपत्तिन्यायेन तत्प्रतिपत्तिसंभवे तत्र शक्तिकल्पने गौरवात्। यथाहुः। सर्वत्र यौगिकैः शब्दै

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रव्यमेवाभिधीयते। नहि संबंधवाच्यत्वं संभवत्पत्नीगोस्वादिति। तथा। पाकं तु पत्नी रेवाह कर्त्री रंप्रत्ययोऽप्यकः। पाकयुक्तः पुनः
कर्त्ता वाच्यो नैकस्य कस्यचित् इति। तथा च न समाख्या संबंधवाचिका। होतृचमसइत्यादिका तु वैदिकी समाख्या निषादस्थपति
शब्दवत्तत्र षष्ठ्यर्थसंबंधवाचिका। नापि वाक्यवत्तद्बोधिका तस्याः पदत्वेनाप्रमाणत्वात्। पौरोडाशिकमित्यादिसामाख्यास्त्व
ति दुर्बलाः लौकिकत्वेन पुरुषप्रत्ययसापेक्षत्वात्। कांडगोचरत्वेन तत्तत्पदार्थागोचरत्वाच्च। कांडवाचकत्वमपि न कांडत्वेन किंतु
पौरोडाशिकत्वादिनैव। न ह्येकहायनीशब्दोऽद्रव्यवाचको पिंगोत्वेन तद्वदति। किं तर्हि एकहायनीत्वेनैव। एवं च विनियोगे तु
पदार्थयो विशेषपुरस्कारेणैव संबंधः प्रत्यक्षप्रमाणप्रतिपन्नो अतश्च समाख्यामुपलभ्य नूनमनयोः पदार्थयोः संबंधोऽस्ती
ति यावत्कल्प्यते तावत्प्रत्यक्षप्रतिपन्नेन संबंधेन परस्परमाकांक्षा। तदभावे संबंधानुपपत्तेः। कल्पितसंबंधेन च यावदितरत्राकांक्षादि
कल्प्यते तावदन्यत्राकांक्षया वाचचादिकल्पनया विनियोगः क्रियत इति सिद्धं स्थानस्य समाख्यातः प्राबल्यं। अत एव शुंधध्वमंत्रः।
सान्नाय्यपात्रांगं पाठसादेश्यात् तु पौरोडाशिकसमाख्यया पौरोडाशिकपात्रांगमिति। समाख्या यौगिकः शब्दः। सा च द्विविधा। (लौ)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंकी वैदिकीच। तत्र हेतुश्चमसभक्षणांगत्वं होत्र चमस इति वैदिक्या समाख्यया। अध्वर्योस्तत्तत्पदार्थांगत्वं लौकिक्या। ध्वर्यवं इति समाख्यये
ति संक्षेपः। तदेवं निरूपितानि संक्षेपतः श्रुत्यादीनि षट् प्रमाणानि। एतत्सहकृतेन च विनियोगविधिना समिदादिभिरुपकृतस्य दर्शपूर्णमास
स्यां स्वर्गकामो यजेतेत्येवं रूपेण यानि युज्यन्ते तान्यंगानि। तानि द्विविधानि। सिद्धरूपाणि क्रियारूपाणि चेति। तत्र सिद्धानि जातिद्रव्यसंख्यादी
नि। तानि च दृष्टार्थान्येव। क्रियारूपाणि च द्विविधानि। गुणकर्माणि प्रधानकर्माणि चेति। एतान्येव सन्निपत्योपकारकाणि आरादुपकारकाणी
ति चोच्यन्ते। तत्र कर्मांगद्रव्याद्युद्देशेन विधीयमानं सन्निपत्योपकारकं यथावघातप्रोक्षणादि। तच्च दृष्टार्थमदृष्टार्थं दृष्टादृष्टार्थं चेति। दृष्टार्थ
मवघातादि। अदृष्टार्थं प्रोक्षणादि। दृष्टादृष्टार्थं पुरोडाशयागादि। तद्धि द्रव्यत्यागांशेनादृष्टं देवतोद्देशेन देवतास्मरणं। दृष्टं करोति। इदमेव
चाश्रयीकर्मेत्युच्यते। तच्च सन्निपत्योपकारकं द्विविधं। उपयोक्ष्यमाणार्थं उपयुक्तार्थं चेति। तत्रावघातप्रोक्षणाद्युपयोक्ष्यमाणार्थं
व्रीहीणां यागे उपयोक्ष्यमाणत्वात्। प्रतिपत्तिकर्मेडाभक्षणाद्युपयुक्तपुरोडाशसंस्कारकं। उपयुक्तस्याकीर्णकरतानिवर्तकं कर्म
प्रतिपत्तिकर्म। उपयुक्तसंस्कारार्थं कर्मोपयोक्ष्यमाणसंस्कारार्थाद्दुर्बलं। उपयुक्तापेक्षया उपयोक्ष्यमाणेऽत्यादरात्। अत एव प्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यणीयस्य निष्कासेऽउदयनियममनुनिर्वपतीत्यत्र निष्कासस्य निर्वापार्थत्वं न तु तत्स्यात्तदर्थत्वं निष्कासस्योपयुक्तत्वादित्यकर्मैकादशे। तच्च
सन्निपत्योपकारकमाराडुपकारकाद्बलीयः। ननु अवघातादिभवतु नाम बलीयस्तस्य दृष्टार्थत्वात्। आराडुपकारस्य चादृष्टार्थत्वात्।
दृष्टे च संभवति अदृष्टस्य चान्याय्यत्वात्प्रोक्षणादि सन्निपत्योपकारकं तु कथं बलीयः। उभयोरदृष्टार्थत्वाविशेषात्। किंच आराडुपका
रकं साक्षात्प्रधानांगं। तस्यान्योद्देशेनाविधानात् सन्निपत्योपकारकं त्वंगांगं कर्मांगव्रीह्याद्युद्देशेन विधानात्। अंगांगापेक्षया साक्षा
दंगं बलीयः। अंगगुणविरोधे तादर्थ्यादिति न्यायात्। अत एव यदि इष्ट्या पशुना सोमेन यजेत सोमावास्यां वा पौर्णमास्यां वा यजेतेति अविशिष्ट
विधानेऽपि पर्वानुग्रहः सोमयागस्यैव क्रियते न तु दीक्षणीयादेरतः कथं सन्निपत्योपकारकस्य बलीयस्त्वं। उच्यते। सत्यप्यदृष्टार्थत्वाविशेषे
सन्निपत्योपकारकमाराडुपकारकाद्बलीयः। सन्निपत्योपकारके हि कर्मणि उपकार्योपकारकयोर्व्रीहिप्रोक्षणयोः संबंधो वाक्यक्लृप्तः उपकारसा
त्रं तु कल्प्यं। आराडुपकारकस्थले तु दर्शपूर्णमासप्रयाजयोः संबंधकत्व उपकारोऽपि। किंच आराडुपकारकस्थले हि प्रकरणं विनियोजकं अन्य
त्र तु व्रीहीन्प्रोक्षतीति वाक्यमेव व्रीहिपदेनापूर्वसाधनलक्षणां कृत्वा क्रतौ विनियोजकमिति बलीयस्त्वं। यच्चोक्तं अंगगुणविरोधे तादर्थ्यादिति न्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या०प्र०

येनदुर्बलत्वमिति तदसत्। नहि व्रीह्याद्युद्देशेन विधीयमानं प्रोक्षणादि तदर्थं भवति तत्स्वरूपे आनर्थक्यात्। किंतु तत्संस्कारद्वाराक्रत्वर्थमेव। स
न्निपत्योपकारकाणामुसल्यपूर्वप्रयुक्तत्वस्य वक्ष्यमाणत्वात्। अतनुभयविधमप्यंगजातं क्रत्वर्थमेवेति नांगगुणविरोधन्यायावतारः दीक्षणीया
देः पर्वानुग्रहस्तु दीक्षणीयार्थ एव। तस्य तदपूर्वप्रयुक्तत्वात्।। अतोऽयुक्तं साक्षात्प्रधानांगेन प्रधानपर्वानुग्रहेणास्य बाध्यत्वमिति। नास्त्विथं
संनिपत्योपकारकस्यारादुपकारकाद्बलीयस्त्वं। अत एव स्थाणौ स्थाण्वाहुतिं जुहोतीति विहितास्थाण्वाहुतिर्यूपावश्चनस्थाणुद्वारा यूपसं
स्कारार्था। देवदत्तधारितायाः स्रजः क्वचिद्देशे निधानमिव देवदत्तसंस्कारार्थं। ननु स्थाण्वाहुतिरारादुपकारिकेत्युक्तं दशमे इति दिक्।
द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म आरादुपकारकं। यथा प्रयाजादि। तदेवं निरूपितं द्विविधमप्यंगजातं तच्च न यागादिस्वरूप
प्रयुक्तं। स्वरूपे आनर्थक्यात्। तदंतरेणापि तत्सिद्धेः। किंत्वपूर्वप्रयुक्तमेव। नहि तदंतरेणापूर्वं भवतीत्यत्र किंचित्प्रमाणमस्ति। तस्यादृ
ष्टत्वात्। नन्वेवं प्राधान्याददृष्टत्वाच्च फलप्रयुक्तमेव किं न स्यादिति वाच्यं। फलभावनायां यागस्य करणत्वादंगानां च करणानुग्रा
हकत्वात्तदर्थत्वे बुध्यते तत्र चानर्थक्यप्रसक्तौ तेन यागेन स्वापूर्वमाधेयोपस्थाप्यते। संनिकर्षात्। दीक्षणीयायाश्चेनेव तदपूर्वं न तु फल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुपस्थाप्यते। विप्रकर्षात्। अतोनन्तरप्रयुक्तत्वमंगानां। अतएवागन्मस्तुवः सुवरगान्मेतिमंत्रो विकृताबूहितव्यइत्युक्तं नयमेफलदेवतयोश्चेत्यत्रोफलप्रयुक्तत्वेतुसौर्यादिविकृतेषु स्वर्गरूपफलाभावान्मंत्रोनप्रवर्तेत। नतरांचोहितव्यः स्यादिति। तात्सिद्धमंगानामन्यप्रयुक्तत्वानुपपत्तेरपूर्वप्रयुक्तत्वं। तत्रापिसन्निपत्योपकारकाणांद्रव्यदेवतादिसंस्कारद्वारायागस्वरूपेउपयोगात्तत्पूर्वार्थत्वं। अतएवौषधिधर्माणामवघातादीनांआज्येनिवृत्तिः। तेषामानेयापूर्वप्रयुक्तत्वादाज्यस्यचतदर्थत्वाभावादित्युक्तं॥ नतीये। आरादुपकारकाणांतुस्वरूपेअनुपयोगात्। परमापूर्वार्थत्वं। तत्रोत्पत्त्यपूर्वस्ययागस्वरूपानुष्ठानानन्तरमेवोत्पद्यमानत्वात्सन्निपत्योपकारकाणापूर्वांगानांतेदुत्पत्तावनुपयोगः। उत्तरांगानांतुतेषांतत्स्थितावुपयोगः। परमापूर्वस्यतुसांगप्रयोगानुष्ठानानन्तरमेवोत्पद्यमानत्वात्सर्वेषामारादुपकारकाणांतदुत्पत्तावेव योगबहिर्भूतस्यतुतस्यतत्स्थितावुपयोगः। यथाबृहस्पतिसवस्यवाजपेयेनेष्ट्वा बृहस्पतिसवेनयजेतेतिवाजपेयोत्तरकालत्वेनविहितस्यवाजपेयापूर्वस्थितावुपयोगः। तस्यप्रागेवोत्पन्नत्वादित्युक्तंचतुर्थे। तात्सिद्धंसर्वथांगानांअपूर्वार्थत्वं। प्रकृतमनुसरामः। तदेवन्निरूपितः संक्षेपतो विनियोगविधिः। प्रयोगप्राशुभावबोधकोविधिः प्रयोगविधिः। सर्वांग

KKSU LIBRARY
RAMTEK
441 106
M-1665
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाक्यैकवाक्यतामापन्नः प्रधानविधिरेव। स हि सांगं प्रधानमनुष्ठापयन् विलंबे प्रमाणाभावात्। अविलंबापरपर्यायं प्रयोगप्राशुभावं विधत्ते।
न च विलंबवदविलंबेपि प्रमाणाभाव इति वाच्यं। विलंबे हि अंगप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तिः प्रसज्येत न हि विलंबेन क्रिय
माणयोः पदार्थयोः सहार्थीकृतमिति साहित्यं व्यवहरंति। न चैवं साहित्यानुपपत्त्या समानकालत्वमेव स्यान्न त्वविलंबः अव्यवधानेन पूर्वो
त्तरकालक्रियमाणपदार्थयोरविलंबेन कृतमिति व्यवहारादिति वाच्यं।। अनेकपदार्थानामेकस्मिन्काले नुष्ठानानुपपत्तेः। न च तावत्कर्तृ
संपादनेनानुष्ठानं किं न स्यादिति वाच्यं। तस्यै तस्य यज्ञक्रतोश्चत्वार ऋत्विज इत्यादिना कर्तॄणां नियतत्वात्। तस्मादंगवाक्यैकवाक्य
तामापन्नः प्रधानविधिरेकवाक्यतावगततत्साहित्यं विदधदुक्तविधया एककालानुष्ठानानुपपत्तेरविलंबं विधत्त इति सिद्धं। प्रयोगप्रा
शुभावबोधको विधिः प्रयोगविधिरिति। स चाविलंबो नियते क्रमे आश्रीयमाणे भवति। अन्यथा हि किमेतदनंतरमेतत्कर्तव्यमेतदनंतरमेवेत्यादि
ति प्रयोगविक्षेपापत्तेः। अतः प्रयोगविधिरेव स्वविधेयप्रयोगप्राशुभावसिध्यर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते। तत्र क्रमो ना
म विततिविशेषः। पौर्वापर्यरूपो वा। तत्र च षट् प्रमाणानि। श्रुत्यर्थपठनस्थानमुख्यप्रवृत्त्याख्यानि। तत्र क्रमपरवचनं श्रुतिः। तच्च द्विविधं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केवलं क्रमपरं तद्विशिष्टपदार्थपरं चेति। तत्र वेदं कृत्वा वेदिं करोतीति केवलक्रमपरं। वेदिकरणादेर्वचनांतरेण विहितत्वात्। वषट्कर्तुः प्रथमभक्ष इति तु क्रमविशिष्टपदार्थपरं। एकप्रसरताभंगभयेन भक्षानुवादेन क्रममात्रस्य विधातुमशक्यत्वात्। सेयं श्रुतिरितरप्रमाणापेक्षया बलवती तेषां वचनकल्पनद्वारा क्रमप्रमाणत्वात्। अत एवाश्विनस्य पाठक्रमात्तृतीयस्थाने ग्रहणप्रसक्तौ आश्विनो दशमो गृह्यत इति वचनाद्दशमस्थाने ग्रहणमित्युक्तं। यत्र प्रयोजनवशेन निर्णयः स अर्थक्रमः। यथाग्निहोत्रहोमयवागूपाकयोस्तत्र हि यवाग्वा होमार्थत्वेन तत्पाकः प्रयोजनवशेन पूर्वमनुष्ठीयते स चायं पाठक्रमाद्बलवान्। यथापाठं ह्यनुष्ठाने हि प्रयोजनबाधः अदृष्टार्थत्वं च स्यात्। नहि होमानंतरं क्रियमाणस्य किंचिद्दृष्टं प्रयोजनमस्ति। पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः तस्माच्च पदार्थानां क्रम आश्रीयते। येन हि क्रमेण वाक्यानि पठितानि तेनैव क्रमेणाधीतान्यर्थप्रत्ययं जनयंति। यथार्थप्रत्ययं च पदार्थानामनुष्ठानात्। स च पाठो द्विविधो मंत्रपाठो ब्राह्मणपाठश्चेति। तत्राग्नेयाग्नीषोमीययोस्तत्तद्याज्यानुवाक्याक्रमाद्यः क्रम आश्रीयते स मंत्रपाठात्। स चायं मंत्रपाठो ब्राह्मणपाठाद्बलवान्। अनुष्ठाने

वौवया ब्राह्मणपाठापेक्षया मंत्रस्यांतरंगत्वात्। ब्राह्मणवाक्यं हि प्रयोगाद्बहिरेवेदमेवं कर्तव्यमित्यवबोध्य कृतार्थं। मितिन पुनः प्रयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गकाले व्याध्रीयते॥ मंत्राः पुनरनन्यप्रयोजनाः प्रयोगसमवेतार्थस्मारका इति वक्ष्यामः॥ तेनानुष्ठानक्रमस्य स्मरणक्रमाधीनत्वात्॥ त

च क्रमस्यैव मंत्रक्रमाधीनत्वात्। अतस्तं गो मंत्रपाठः इतरस्मादतिबलवान्। अत एवाग्नेयाग्नीषोमीययोर्ब्राह्मणपाठात्। आदावग्नीषो

मीयानुष्ठानपश्चादाग्नेयानुष्ठानमित्येवं क्रमं बाधित्वा मंत्रपाठात् आदावाग्नेयानुष्ठानपश्चादग्नीषोमीयस्येत्येवं क्रम इत्युक्तं। प्रया

जानां सन्निधौ यजति तनूनपातं यजतीत्येवं विधायकवाक्यक्रमाद्यः क्रमः स ब्राह्मणपाठक्रमः। अत्र च यद्यपि ब्राह्मणवाक्यान्य

र्थे विधायकत्वात् श्रौतानि तथापि प्रयाजानां स्मारकान्तरस्याभावात्। तान्येव स्मारकत्वेन स्वीक्रियंते। तथा च येन क्रमेण तान्यधी

तानि तेनैव क्रमेणार्थस्मरणं जनयंतीति युक्तं तेनैव क्रमेण तेषामनुष्ठानमिति। तत्सिद्धं प्रयाजानां ब्राह्मणपाठक्रमात् क्रम

इति। ननु प्रयाजेषु प्रयोगसमवेतार्थस्मारकत्वं कर्मविधायकत्वेन कृतार्थानां ब्राह्मणवाक्यानां किमिति स्वीक्रियते। प्रयोगसमवे

तार्थस्मारकाणां याज्यामंत्राणां आग्नेयादिष्विवात्रापि सत्त्वात्। न च तेषां देवतास्मारकत्वात् कर्मस्मारकत्वेन ब्राह्मणवाक्यं स्वी (२५

क्रियत इति वाच्यं॥ आग्नेयादिष्वपि कर्मस्मारकत्वेन तत्स्वीकारापत्तेः। न चेष्टापत्तिः। तथा सति ब्राह्मणपाठान्मंत्रपाठस्य बलीय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्वं न स्यात्। तद्बलीयस्त्वं हि मंत्राणां प्रयोगसमवेतार्थस्मारकत्वं इतरस्य तदस्मारकत्वं हेतुः। यदि च कर्मस्मारकत्वं ब्राह्मणवाक्यस्य
स्वीक्रियते तदा प्रधानस्मारकत्वेन ब्राह्मणवाक्यस्यांतरंगत्वात्। अंगभूतदेवतास्मारकत्वेन च मंत्राणां बहिरंगत्वान्मंत्रपाठाद्ब्राह्मणपाठस्यै
व बलीयस्त्वात्। तथा च मंत्रैक्यविरोधे स्यादिति पाञ्चमिकाधिकरणविरोधः। तत्र हि ब्राह्मणपाठान्मंत्रपाठस्य बलीयस्त्वाद् दोहनमाग्ने
यानुष्ठानं पश्चादग्नीषोमीयस्येत्युक्तं। अथाग्नेयादिषु याज्यामंत्रा एव देवताप्रकाशनद्वारा कर्मप्रकाशकत्वं त्यमानद्व्योद्देश्य
त्वरूपत्वाद्देवतात्वस्येति चेत्तुल्यं प्रयोजेषु। तत्रापि हि याज्यामंत्रा देवताः प्रकाशकाः। प्रयोजेषु देवतायाः प्रकाशकामंत्रवर्णिकत्वात्। य
था च प्रयाजेषु याज्यामंत्राणां देवताप्रकाशनद्वारा कर्मप्रकाशकत्वात् तत्क्रमो मंत्रपाठादेव स्यान्न तु ब्राह्मणपाठक्रमात् एवं मंत्रपाठस्या
न्यादृशत्वात् प्रयाजक्रमो ब्राह्मणपाठक्रमादेवेति वक्तव्यं। अन्यादृशत्वे तस्यैव क्रमस्यानुष्ठानं स्यात्। मंत्रक्रमस्य बलीयस्त्वात्। अथ
साधिकरणे च वार्त्तिककृता ताक्रमविनियुक्तेवं लिंगकमंत्रवर्णेत्यादिना प्रयाजेषु याज्यामंत्राणां क्रमविनियोगस्तत्कः नवमेऽपि तंत्ररत्ने स
मिधो अग्न आज्यस्य व्यन्त्वित्यादिभिः क्रमप्रकरणप्राप्ते मंत्रे देवतागुणत्वेन समर्थ्यते इत्युक्तं मंत्राणामन्यादृशक्रमत्वे तदनुपप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तिः स्यात् तत्कथं प्रयाजेषु ब्राह्मणपाठक्रमात् क्रम इत्युच्यते सत्यमेतत् तथापि यत्रार्थस्मारकामंत्रा न संत्येव यथा तूष्णीं विहितेषु कर्मसु तेषां क्र

मो ब्राह्मणपाठक्रमात्। तत्र तेषामेव प्रयोगसमवेतार्थस्मारकत्वात्। प्रयाजोदाहरणं तु कृत्वा चिंतया। तत्र ब्राह्मणवाक्यानां प्रयोगसमवेतार्थस्मा

रकत्वाभावात्। यथाहुः। अर्थवादचरणे वार्त्तिककाराः प्रयाजादिवाक्यान्यर्थसामर्थ्यचरितार्थानि स्वरूपसंस्पर्शे सत्यपि प्रयोजकतां न प्रति

पाद्यं तद् इति। तस्मात् समंत्रककर्मणां पाठक्रमो मंत्रपाठात्। अमंत्रकपाठक्रमस्तु ब्राह्मणपाठक्रमादेवेति दिक्। प्रकृतौ नानादेशानां पदार्था

नां विकृतौ वचनादेकस्मिन् देशेऽनुष्ठाने कर्तव्ये यस्य देशे अनुष्ठीयंते तेन तस्य प्रथममनुष्ठानमितरयोः स्वपश्चादयं यः क्रमः स स्थानक्रमः।

स्थानं नाम उपस्थितिः। यस्य हि देशेऽनुष्ठीयंते तेन तत्पूर्वेतनपदार्थकृतोऽस्य एव प्रथममुपस्थितो भवतीति युक्तं तस्य प्रथममनुष्ठानं। अत एव

वसाद्यस्क्रे अग्नीषोमीयसवनीयानुबंध्यानां सवनीयदेशे सहानुष्ठाने कर्तव्ये आदौ सवनीयपशोरनुष्ठानं। तस्मिन् देशे आश्विनग्र

हग्रहणानंतरं सवनीयस्यैव प्रथममुपस्थितेरितरयोः स्वपश्चात्। तथाहि। ज्योतिष्टोमे त्रयः पशुयागाः। अग्नीषोमीयः सवनीयोऽनुबंध्य २८

श्चेति। ते च भिन्नदेशीयाः अग्नीषोमीयस्तु औपवसथ्येऽह्नि सवनीयः सुत्याकाले अनुबंध्यस्त्वंते। साद्यस्क्रो नाम सोमयागविशेषः। तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्कृत्वाऽज्योतिष्टोमविकारः। अतस्तत्रयोऽपि पशुयागाः साद्यस्क्रे चोदकप्राप्ताः। तेषां च तत्र साहित्यं श्रुतं सह पशूनालभत इति। तच्च साहित्यं स
वनीयदेशे तस्य प्रधानप्रत्यासत्तेः। स्थानातिक्रमसाम्याच्च सवनीयदेशे ह्यनुष्ठाने क्रियमाणे अग्नीषोमीयानुबंध्ययोः स्वस्वस्थानातिक्र
ममात्रं भवति। अग्नीषोमीयदेशे त्वनुष्ठाने सवनीयस्य स्वस्थानातिक्रममात्रं। अनुबंध्यस्य तु स्वस्थानातिक्रमः सवनीयस्थानातिक्र
मश्च स्यात्। एवमनुबंध्यदेशेऽग्नीषोमीयस्य द्रष्टव्यः। तथा सवनीयदेशे सर्वेषामनुष्ठाने कर्तव्ये सवनीयस्य प्रथममनुष्ठानं। आश्वि
नग्रहणानंतरं हि सवनीयदेशः प्रकृतावाश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीति आश्विनग्रहणा
नंतरं तस्य विहितत्वात्। तथा च साद्यस्क्रेऽप्याश्विनग्रहणोत्कृते सवनीय एवोपस्थितो भवतीत्युक्तं तस्य स्थानात्प्रथममनुष्ठानं इत
रयोस्तु पश्चादित्युक्तं। प्रधानक्रमेण योंऽगानां क्रम आश्रीयते स मुख्यक्रमः। येन हि क्रमेण प्रधानानि क्रियंते तेनैव क्रमेण चे
त्तेषामंगान्यनुष्ठीयंते तदा सर्वेषामंगानां स्वैः प्रधानैस्तुल्यं व्यवधानं भवति। व्युत्क्रमेण त्वनुष्ठाने केषांचिदंगानां स्वैः प्रधानैरत्यंत
मव्यवधानमन्येषामत्यंतव्यवधानं स्यात्। तच्चायुक्तं। प्रयोगविध्यवगतसाहित्यबाधापत्तेः। अतः प्रधानक्रमोऽपि अंगक्रमहेतुः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या॰प्र॰

अतएवप्रयाजशेषेणादौ आग्नेयहविषोभिघारणं पश्चादैंद्रस्य दध्नो आग्नेययागैंद्रयागयोः पौर्वापर्यात्। अत्र हि द्वयोरभिघारणयोः
स्वस्वेनप्रधानेन तुल्यमेकांतरितव्यवधानं भवति। आग्नेयहविरभिघारणाग्नेययागयोरैंद्रयागहविरभिघारणेन व्यवधानात्। ऐंद्र
यागहविरभिघारणैंद्रयागयोश्चाग्नेययागेन व्यवधानात्। तत्स्थाद्वाग्नेयहविरभिघारणं तत ऐंद्रस्य हविषस्तत आग्नेययागस्तत
ऐंद्रोयाग इत्येवं क्रमामुख्यक्रमात्त्रिधो भवति। यदि त्वादावैंद्रहविषोघारणं तत आग्नेययागस्य क्रियते। तदा याज्यानुवाक्या
क्रमवशादादावाग्नेयस्यानुष्ठानादाग्नेययागतदंगहविरभिघारणयोरत्यंतमव्यवधानं। ऐंद्रयागतदंगहविरभिघारणयो
स्त्वसंतं व्यवधानं स्यात् तच्च न युक्तं। अतो युक्तः प्रयाजशेषाभिघारणस्य मुख्यक्रमात् क्रम इति। स चायं मुख्यक्रमः पाठ
क्रमाद्दुर्बलः मुख्यक्रमो हि प्रमाणांतरसापेक्षः प्रधानक्रमप्रतिपत्तिसापेक्षतया विलंबितप्रतिपत्तिकः। पाठक्रमस्तु निरपे
क्षस्वाध्यायपाठक्रममात्रसापेक्षतया न तथेति बलवान्। अत एवाग्नेयोपांशुयाजाग्नीषोमीयानां क्रमेणानुष्ठीयमानानामपि
उपांशुयाजाज्यनिर्वापो मुख्यक्रमात्पूर्वमनुष्ठीयते तस्य दुर्बलत्वात्। पाठक्रमात्तु पश्चादनुष्ठीयते तस्य प्रबलत्वादिति। स चायं मुख्यक्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मः प्रवृत्तिक्रमाद्बलवान् प्रवृत्तिक्रमे ह्याश्रीयमाणे बहूनामंगानां प्रधानविप्रकर्षो भवति। अस्मिंस्त्वाश्रीयमाणे सन्निकर्षस्तद्यथा दर्शपू
र्णमासयोरादावाग्नेयानुष्ठानं ततः सान्नाय्यस्य। तद्धर्माश्चैके चित्पूर्वमनुष्ठीयंते। तत्र यदि प्रवृत्तिक्रममाश्रित्य तद्धर्माः सर्वे पूर्वमनुष्ठीयेर
न् तत आग्नेयधर्मास्तदा तद्धर्माणां स्वप्रधानेन सह द्वाभ्यामाग्नेयधर्मैस्तदनुष्ठानाभ्यां विप्रकर्षः स्यात्। यदा तु सान्नाय्यधर्माणां केषाचि
त्पूर्वमनुष्ठानेपि अन्ये सर्वे मुख्यक्रममाश्रित्याग्नेयधर्मानुष्ठानानंतरमनुष्ठीयंते तदा सर्वेषामाग्नेयधर्मैः सान्नाय्यधर्माणामेके न विजातीयेन व्य
वधानं भवति। आग्नेयधर्माणां स्वप्रधानेन सह सान्नाय्यधर्मैर्व्यवधानात्। सान्नाय्यधर्माणां च स्वप्रधानेन सहाग्नेयानुष्ठानेन व्यवधानादिति
न विप्रकर्षः। तस्मात्सुमुख्यक्रमः प्रवृत्तिक्रमाद्बलवान्॥ सह प्रयुज्यमानेषु प्रधानेषु सन्निपातिनामंगानामावृत्त्यानुष्ठाने कर्तव्ये द्वितीयादि
पदार्थानां प्रथमानुष्ठितपदार्थक्रमाद्यः क्रमः स प्रवृत्तिक्रमः। यथा प्राजापत्येष्टिषु प्राजापत्यान्हि। वैश्वदेवीं कृत्वा प्राजापत्यैश्चरंतीति वाक्ये
न तृतीयानिर्देशात्सेतिकर्तव्यताका एककालत्वेन विहिताः। अतस्तेषां तदंगानां चोपाकरणनियोजनप्रभृतीनां साहित्यं संपाद्यं। तत्र प्राजा
पत्यानां संप्रतिपन्नदेवताकत्वेनैकस्मिन्काले ऽनुष्ठानादुपपद्यते साहित्यं। तदंगानां चैकस्मिन्काले ऽनुष्ठानमशक्यं। न ह्यनेकेषां पशूनामु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाकरणमेकस्मिन्काले कर्तुं शक्यं। अतस्तेषां साहित्यमव्यवधानेनानुष्ठानात्संपाद्यं। एकस्योपाकरणं कृत्वापरस्योपाकरणमिति। अतः प्राजापत्येष्वे
कं पदार्थं सर्वत्रानुष्ठाय द्वितीयपदार्थोऽनुष्ठेयः। तत्र प्रथमपदार्थानुष्ठानं कस्माच्चित्पशोरारभ्य कर्तव्यं। द्वितीयस्तु पदार्थो येन क्रमेण प्रथमो
ऽनुष्ठितस्तेनैवानुष्ठेयः। प्रयोगविध्यवगतस्य मिथोंगसाहित्यस्योपपत्तये। प्रयोगविधिना हि देशतदंगोपाकरणनियोजनादीनां मिथः सा
हित्यमानंतर्यापरपर्यायं विहितं। तच्च साहित्यं सवनीयपशौ चोदकेन प्राप्तं। तस्य प्राप्तिद्व्यकत्वेन दैक्षविकृतित्वात्। सवनीयाश्चैकादशिनेषु प्रा
प्तं सुत्याकालत्वसामान्यात्। तेभ्यश्च प्राजापत्येषु प्राप्तेगणत्वसामान्यात्। प्राजापत्येषु च प्रतिपशु यागभेदाच्चोदकाभिद्यते। अतश्चोदका
त्तत्पश्वंगभूतानामुपाकरणनियोजनादीनां साहित्यमानंतर्यापरपर्यायं प्राप्तं। अत एकस्य पशोरुपाकरणानंतरमेव च नियोजनं चोदक
बलात्कर्तव्यत्वेन प्राप्तं। तत्तु न क्रियते। प्रत्यक्षवचनावगतसर्वपश्वंगसाहित्यानुपपत्तेः। अत एकस्मिन्पशावुपाकरणे कृते तदनंतर
मेव कर्तव्यत्वेन प्राप्तमपि नियोजनं न क्रियते प्रत्यक्षवचनबलात्तु पश्वंतरेषु षोडशस्वुपाकरणमेव क्रियते। कृते तेषूपाकरणे प्रथमपशौ १०
तियोजनस्य तदीयोपाकरणेन व्यवधाने प्रमाणाभावात्प्रथमपशावेव नियोजनं कार्यं। अतश्च येन क्रमेणोपाकरणं कृतं तेनैव क्रमेण नियो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनं कार्यं। एवंच तत्तत्पश्वपाकरणानां स्वस्वनियोजनैस्तुल्यं षोडशानां सपौर्व्यव्यवधानं भवति। अन्यथा केषांचिदत्यंतं व्यवधानं केषांचिद्व्यवधा
नं स्यात्। तच्च न युक्तं। तस्माद्येन क्रमेण प्रथमपदार्थोनुष्ठितस्तेन क्रमेणैव द्वितीयोनुष्ठेयः। तत्सिद्धं प्रथमानुष्ठिते पदार्थक्रमाद्यो द्वितीयप
दार्थक्रमः स प्रवृत्तिक्रम इति। तदेवं निरूपितं संक्षेपतः षड्विधक्रमनिरूपणेन प्रयोगविधिव्यापारः॥ ॥श्रीशिवो जयति॥ ॥ ॥
फलस्वाम्यबोधको विधिरधिकारविधिः। फलस्वाम्यं च कर्मजन्यफलभोक्तृत्वं। स च यजेत स्वर्गकाम इत्येवंरूपः। अनेन हि स्वर्गमुद्दिश्य या
गं विदधता स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते। यस्याहिताग्नेरग्निर्गृहान्दहेत्सोग्नये क्षामवतेऽष्टाकपालं निर्वपेदित्यादिभि
स्त्वग्निदाहादौ निमित्ते कर्म विदधद्भिर्निमित्तवतः कर्मजन्यपापक्षयरूपफलस्वाम्यं प्रतिपाद्यते। तच्च फलस्वाम्यं तस्यैव योधिकारिविशेषणे
न विशिष्टः। अधिकारिविशेषणं च तदेव यत्पुरुषविशेषणत्वेन श्रुतं। अत एव राजा राजसूयेन स्वाराज्यकामो यजेतेत्यनेन स्वाराज्यमुद्दि
श्य राजसूयं विदधतापि न स्वाराज्यकाममात्रस्य तत्फलभोक्तृत्वं प्रतिपाद्यते। किंतु राज्ञः सतस्तत्कामस्य। किंचित्तु पुरुषविशेषणत्वेनाश्रु
तमप्यधिकारिविशेषणं भवति। यथाध्ययनविधिसिद्धा विद्या। अग्निसाध्येषु च कर्मस्वाधानसिद्धाग्निमत्ता सामर्थ्यं च। एतेषां पुरुषविशेषणत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाश्रवणेपि अधिकारिविशेषणत्वमस्त्येव। उत्तरक्रतुविधीनां ज्ञानाक्षेपशक्तेरभावेनाध्ययनविधिसिद्धज्ञानवन्तं प्रत्येव प्रवृत्तेः। अग्निसाध्य
कर्मणाञ्चाग्न्यपेक्षत्वेन तद्विधीनामाधानसिद्धाग्निमन्तं प्रत्येव प्रवृत्तेः। अतएव च शूद्रस्य न यागादावधिकारस्तस्याध्ययनविधिसिद्धज्ञा
नाभावात्। आधानसिद्धाग्न्यभावाच्च। अध्ययनस्योपनीताधिकारत्वात् उपनयनस्य चाष्टवर्षं ब्राह्मणमुपनयीतेत्यादिना त्रैवर्णिकाधि
कृतत्वात्। आधानस्यापि वसन्ते ब्राह्मणोऽग्निमादधीतेत्यादिना त्रैवर्णिकाधिकारत्वात्। यद्यपि च वर्षासु रथकारोऽग्नीनादधीतेत्यनेन रथका
रस्य सौधन्वनत्र्यनुपर्यायस्याधानं विहितं योगाद्रूढेर्बलीयस्त्वात्। तथापि नास्योत्तरकर्मस्वधिकारः। अध्ययनविधिसिद्धज्ञानाभावात्।
न च तदभावे आधानेपि कथमधिकारस्तदनुष्ठानस्य तत्साध्यत्वादिति वाच्यं। तस्याध्ययनविधिसिद्धज्ञानाभावेपि वर्षासु रथकारोऽग्नीना
दधीतेत्यनेनैव विधिनाधानमात्रोपयिकज्ञानापेक्षणात्। अन्यथैतस्यैव विधेरनुपपत्तेः। अथ च रथकारस्याधानमात्रेधिकारेपि नोत्त
रकर्मस्वधिकारो विध्यभावात्। एवं च तदाधानं नाग्निसंस्कारार्थं। संस्कृतानामग्नीनामुत्तरत्रोपयोगाभावात्। किं तु तदाधानं लौकिकाग्निगु
णकं विश्वजिन्न्यायेन स्वर्गफलं स्वतन्त्रमेव प्रधानकर्म विधीयते। अग्नीनिति च द्वितीया सक्तून् जुहोतीतिवत्तृतीयार्थ इति प्रकृतमनुसर

विद्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रापः। तत्सिद्धं शूद्रस्याध्ययनविधिसिद्धज्ञानाभावादाधानसिद्धाग्न्यभावाच्च नोत्तरकर्मस्वधिकार इति। नन्वेवं स्त्रियोऽधिकारो न स्यात्। त-
स्या अध्ययनप्रतिषेधेन तद्विधिसिद्धज्ञानाभावात्। न च नास्त्येवेति वाच्यं। यजेत स्वर्गकाम इत्यादौ स्वर्गकामपदस्योद्देश्यसमर्पकत्वेन पुं-
स्त्वस्योद्देश्यविशेषणत्वात् ग्रहैकत्ववदविवक्षितत्वेन स्त्रिया अधिकारस्य साधितत्वादिति चेत्। सत्यं अधिकारः साधितो न तु स्वात-
न्त्र्येण। न स्त्री स्वातन्त्र्यमर्हतीत्यादिना तस्य निषिद्धत्वात्। स्वातन्त्र्ये पाकर्तृत्वे प्रयोगद्वयस्यापि वैगुण्यापत्तेश्च। यजमानप्रयोगे पत्नीकर्तृ-
काज्यावेक्षणादिलोपात्। पत्नीप्रयोगे च यजमानकर्तृकाज्यावेक्षणादिलोपात्। अतो दंपत्योः सहाधिकारः। सहाधिकारत्वे च यजमानविद्ययैव
पत्न्या अपि कार्यसिद्धेर्न ज्ञानं विना तस्या अधिकारानुपपत्तिः। पापि यद्दण्णन्तु सहत्वं कर्मस्कत तथा पुण्यफलेष्विति वचनेन। स्त्रियोऽधिकारनिर्णयाच्च।
निषादस्थपतेरिवाध्ययनविधिसिद्धज्ञानाविरहिणोऽप्येतया निषादस्थपतिं याजयेदिति वचनान्निषादेष्ट्यां। निषादस्थपतिशब्दे हि निषादं
च तं स्थपतिं चेति कर्मधारयो न तु निषादानां स्थपतिरिति षष्ठीतत्पुरुषः षष्ठ्यर्थलक्षणापत्तेः। एतावानस्ति विशेषः। निषादस्याध्ययन
विधिसिद्धज्ञानाभावे न एतस्यैव विधेस्तत्कर्मोपयिकज्ञानाक्षेपकत्वं। पत्न्यास्तु तादृशज्ञानाभावेपि यजमाने न सहाधिकारात्तस्य च तादृश-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानत्वात्तेनैव च तस्याः कार्यसिद्धेर्नोत्तरक्रतुविधिनां ज्ञानाक्षेपकत्वं। ये तु पत्नीमात्रकर्तृकाः पदार्था आज्यावेक्षणादयस्ते ज्ञानं विना शक्यानु
ष्ठाना इति तद्विधीनां तदाक्षेपकत्वं स्वीक्रियत इति। तात्सिद्धमध्ययनविधिसिद्धज्ञानस्याधानसिद्धाग्निवत्तायाश्चोत्तरकर्मस्वधिकारिविशे
षणत्वमिति। एवं सामर्थ्यस्याप्यधिकारिविशेषणत्वं। असमर्थं प्रति विध्यप्रवृत्तेः। आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति न्यायात्।
तच्च सामर्थ्यं काम्यकर्मण्यंगप्रधानविषयं। न त्वंगासमर्थः प्रधानमात्रसमर्थश्च काम्येऽधिकारी। प्रधानविधेरंगविध्येकवाक्यतापन्नस्य सां
गकर्मसमर्थं प्रत्येव प्रवृत्तेः। यथाविनियोगमधिकारात्। यदि हि समर्थं प्रत्येव प्रवृत्तौ कयाचिच्छ्रुत्या विरोधः स्यात्तदाऽसमर्थस्याप्यधिका
रः स्यात्। न च विरोधोऽस्ति। स्वर्गकामश्रुतेः समर्थं प्रति प्रवृत्तौ विरोधाभावात्। प्रत्युतासमर्थप्रवृत्तौ प्रधानविधेरंगवाक्यैकवाक्यतया
प्रतिपन्नस्यांगसाहित्यस्य बाधापत्तेः। नित्यवच्छ्रुतानामंगानां पाक्षिकत्वप्रसंगाच्च। अतः सांगप्रयोगे समर्थस्यैव काम्यकर्मण्यधिका
रः। नित्यकर्मणां त्वंगेषु यथाशक्तिन्यायः। तानि हि यावज्जीवश्रुत्या यावज्जीवं कर्तव्यत्वेन चोदितानि। न च यावज्जीवं कर्मणः प्र ७२
योगः कर्तुं शक्यते। अतो नित्यकर्मसु प्रधानमात्रसमर्थोऽधिकारी। अंगानि तु यावंति कर्तुं शक्यंते तावंति कार्याणीत्यलं बहुतयास्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिः पराक्रांतत्वात्। तद्सिद्धं फलस्वाम्यबोधको विधिरधिकारविधिरिति। तदेवं निरूपिते चतुर्विधत्वे तन्निरूपणेन विधेः प्रयोजनवदर्थपर्यवसा
ने ॥६७॥ मंत्राणां च प्रयोगसमवेतार्थस्मारकतया ऽर्थवत्त्वं। न तु तदुच्चारणमदृष्टार्थं दृष्टे संभवत्यदृष्टस्यान्याय्यत्वात्। न च दृष्टस्य प्रकारां
तरेणापि संभवान्मंत्राम्नानमनर्थकं मंत्रैरेव स्मर्तव्यमिति नियमविध्याश्रयणात्। साधनद्वयस्य पक्षप्राप्तौ अन्यतरस्य साधनस्याप्राप्त
साद्दशायां यो विधिः स नियमविधिः। यथाहुः। विधिरत्यंतमप्राप्ते नियमः पाक्षिके सति॥ तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयत इति॥ ७०
स्यार्थः। यस्य यदर्थत्वं प्रमाणांतरेणाप्राप्तं तस्य तदर्थत्वेन यो विधिः सोऽपूर्वविधिः। यथा यजेत स्वर्गकाम इत्यादिः। यागस्य हि स्वर्गार्थत्वं न प्र
माणांतरेण ज्ञायते। किंत्वनेनैव विधिनेति भवत्ययमपूर्वविधिः। पक्षेप्राप्तस्य तु यो विधिः स नियमविधिः। व्रीहीनवहन्यादिः। अनेनैव विधि
नावघातस्य नवैतुष्यार्थत्वं बोध्यते। अन्वयव्यतिरेकसिद्धत्वात्। किंतु नियमः। स चाप्राप्तांशपूरणं। वैतुष्यस्य हि ना x दित्या x नोपायसाध्य
त्वाद्यस्यां दशायां अवघातं परित्यज्योपायांतरं गृहीतुमारभ्यते तस्यां दशायां अवघातस्याप्राप्तत्वेन तद्विधानात्मकं अप्राप्तांशपूरणं
एवानेन विधिना क्रियते। अतश्च नियमविधौ अप्राप्तांशपूरणात्मको नियम एव वाक्यार्थः। पक्षे प्राप्ततादशायामवघातविधानमिति याव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्। अपूर्वविधावेवास्यंतो प्राप्तं यागविधानमिति। उभयस्य युगपत्प्राप्तौ इतरव्यावृत्तिपरो विधिः परिसंख्याविधिः। यथा। पंच पंचनखा भ
क्ष्या इति। इदं हि वाक्यं न भक्षणविधिपरं। तस्य रागतः प्राप्तत्वात्। नापि नियमपरं। पंचनखापंचनखभक्षणस्य युगपत्प्राप्तेः पक्षप्राप्त्यभा
वात्। अतइदमपंचनखभक्षणनिवृत्तिपरमिति भवति परिसंख्याविधिः। सा च परिसंख्या द्विविधा श्रौती लाक्षणिकी चेति। तत्रात्र ह्ये
वावपतीत्यत्र श्रौती परिसंख्या। एवकारेण पवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात्। पंच पंचनखा भक्ष्या इत्यत्र तु लाक्षणिकी। इ
तरनिवृत्तिवाचकस्य पदस्याभावात्। अत एवैषा त्रिदोषग्रस्ता। दोषत्रयं च श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति। श्रुतस्य पंचनखभक्ष
णस्य हानात्। अश्रुतापंचनखभक्षणनिवृत्तिकल्पनात्। प्राप्तस्य चापंचनखभक्षणस्य बाधनादिति। अस्मिंश्च दोषत्रये दोषद्वयं शब्दनिष्ठं। प्रा
प्तबाधस्तु दोषोऽर्थनिष्ठ इति दिक्। तस्मिंश्च मंत्रैरेव स्मर्तव्यमिति नियमविधेराश्रयणान्मंत्राम्नानमनर्थकं। अतश्च युक्तं मंत्राणां प्रयोगसमवेता
र्थस्मारकतयार्थवत्त्वं। तत्र ये यत्र मंत्राः पठितास्तेषां तत्र यद्यर्थप्रकाशनं प्रयोजनं संभवति तदा तत्रैव विनियोगः। येषां तु न संभवति तेषां यत्र सं
भवति तत्रोत्कर्षः। यथा पूषानुमंत्रणमंत्राणामित्युक्तं। येषां क्वापि न संभवति तदुच्चारणस्य त्वगत्या दृष्टार्थत्वं। सर्वथापि न तु तेषामानर्थक्यमिति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तजनवत्सलः श्रीरुद्रो जयति ॥ ॥ नामधेयानां विधेयार्थपरिच्छेदकतयार्थवत्वं । तथाहि । उद्भिदा यजेत पशुकाम इत्यत्र हि उद्भिच्छब्दो यागनामधे
यं । तेन च विधेयार्थपरिच्छेदः क्रियते । अनेन हि वाक्येनाप्राप्तत्वात्फलोद्देशेन यागो विधीयते । यागसामान्यस्य चाविधेयत्वाद्यागविशेष एव
विधीयते । तत्र कोऽसौ विशेष इत्याकांक्षायामुद्भिच्छब्दादुद्भिन्नो याग इति सायते । उद्भिदा यागेनेति सामानाधिकरण्येन नामधेयान्वयात् ।
तस्य च यजिना सामानाधिकरण्यं न नीलोत्पलादिशब्दवत् । तत्र ह्युत्पलशब्दस्यार्थो ह्युत्पलादन्यो नीलशब्दस्य वाच्योऽर्थोऽस्ति नीलगुणः ।
लक्षणया तु नीलशब्दस्य द्रव्यपरत्वेन सामानाधिकरण्यं । उद्भिच्छब्दस्य तु यज्यवगतयागविशेषान्नान्यो वाच्यार्थोऽस्ति । विशेषवाचि
त्वात्तस्य । अतश्चार्थान्तरवाचित्वाभावेन न नामधेयस्य नीलशब्दवत्सामानाधिकरण्यं । किं तर्हि वैश्वदेव्यामिक्षेत्यत्रामिक्षाशब्दवत् । वैश्व
देवीशब्दस्य हि देवतातद्धितान्तत्वात्तस्य च सा अस्य देवतेति सर्वनामार्थस्मरणात्सर्वनाम्नां चोपस्थिततद्विशेषवाचित्वेन विशेषपरत्वं । स च को
ऽसौ वैश्वदेवीशब्दोपात्तो विशेष इत्यपेक्षायां आमिक्षापदसंनिधानादामिक्षारूपो विशेष इत्यवगम्यते । यथाहुः । आमिक्षां देवतायुक्तां वद
त्येवैष तद्धितः । आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणमिति । तथा । श्रुत्यैवोपपदस्यार्थः सर्वनाम्ना प्रतीयते । तदर्थे तद्धिते नैव त्रयाणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या० प्र०

मेकवाक्यतेति। तस्माद्यथा वैश्वदेवीशब्दोपात्तविशेषसमर्पकत्वेनामिक्षापदस्य वैश्वदेवीशब्देन सामानाधिकरण्यमेवं सामान्यस्या
विधेयत्वाद्यागविशेषसमर्पकत्वेन नामधेयस्य यजिना सामानाधिकरण्यं। तत्सिद्धं नामधेयानां विधेयार्थपरिच्छेदकतयार्थ
वत्वम्। यथाहुः। तदधीनत्वाद्यागविशेषसिद्धेरिति। नामधेयत्वं च निमित्तचतुष्टयात्। मत्वर्थलक्षणाभयाद्वाक्यभेदभयात्तत्प्रख्यशास्त्रात्तद्व्यपदे
शाच्चेति। तत्रोद्भिदा यजेत पशुकाम इत्यत्रोद्भिच्छब्दस्य यागनामधेयत्वं मत्वर्थलक्षणाभयात्। तथाहि। उद्भिच्छब्दस्य गुणसमर्पकत्वे यागानु
वादेन तावन्न गुणविधानं युज्यते फलपदानर्थक्यापत्तेः। न चानेन वाक्येन फलं प्रति यागविधानं तस्मिंश्च गुणविधानं युज्यते। वाक्यभेदापत्तेः।
नापि गुणफलसंबंधविधानं संभवति। पदद्वयार्थविधाने विप्रकृष्टार्थविधानापत्तेः। धात्वर्थस्य स्वरूपेणाविधानात्तदुद्देशेन वाऽन्यस्य चि
दविधानाज्ञातार्थत्वं तत्पारार्थ्यापत्तेश्च। नहि तदानेन करणं समर्प्यते। गुणस्य करणत्वेनान्वयात्। नापि फलं पशोर्भाव्यत्वेनान्वयात्। अथ गुण
फलसंबंधविधाने यागस्याश्रयत्वेन संबंध इति चेन्न। न यजेतेत्यत्राश्रयवाचकपदाभावात्। अथ सिद्धे तत्करणत्वमिवाश्रयत्वमपि ल
क्ष्यमिति चेन्न। आश्रयत्वापेक्षया करणत्वस्य लघुत्वेन तल्लक्षणाया एव युक्तत्वात्। फलाय विधीयमानो गुणो यत्र कारकतामापद्यते सु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आश्रयः। तत्त्वचाश्रयत्वं। करणत्वं चनिकृष्टाशक्तिरितिलाघवं। किंचगुणफलसंबंधविधानेकरणीभूतोगुणस्तन्निष्ठंवाकरणत्वंतस्यगुणोपसर्जनत्वेन प्रतीतिर्लक्षणयैववाच्या। तृतीययाप्रत्ययार्थत्वेनप्राधान्येनोपस्थितेः। यद्यपिगुणनिष्ठंकरणत्वंफलोद्देशेनविधेयंतदापिफलभावनायाः करणत्वेनान्वययोग्यगुणनिष्ठकरणत्वोपस्थितिर्लक्षणयैववाच्या। तृतीयाभिहितस्यकरणकारकस्यक्रियान्वययोग्यस्यकरणत्वेनान्वयायोग्यत्वात् करणशब्देनाभिहितंहिकरणकारकंतत्वेनान्वययोग्यं। नतृतीयाभिहितं। करणशब्दादिवतृतीयातस्तत्तोयोत्पत्तिप्रसंगात्। अतश्चकरणत्वेनान्वययोग्यगुणनिष्ठकरणत्वोपस्थितिर्लक्षणयैववाच्या। लक्षणयाचोपस्थितकरणत्वस्यकरणीभूतस्यवागुणस्ययत्फलभावनायाकरणत्वंतदपिलक्षणयैववाच्यं। श्रूयमाणयातृतीययागुणमात्रस्ययागंप्रतिकरणत्वाभिधानात्। अतएवतत्रत्वेचतुर्थेकारकीभूतगोदोहनादेःपश्वर्थत्वंसमभिव्याहारादित्युक्तं। अतश्चगुणफलसंबंधविधानेधातोरस्यंतपारार्थ्यादिबहुदोषवत्वादुद्भिच्छब्दस्यगुणसमर्पकत्वेगुणविशिष्टकर्मविधानमेवस्वीकार्यं। तथासतिहियजिनालघुभूतंकरणत्वमात्रंलक्ष्यं। उद्भिच्छब्देनचप्रकृत्यंशेनमत्वर्थमात्रंलक्ष्यमितिगुणफलसंबंधविधानाल्लाघवंभवति। धातोरत्यंतपारार्थ्यादिकंतुनभवत्येव। धात्वर्थस्यैवफलोद्देशेनविधानात्। अतश्चोद्भिच्छब्दस्यगुणसमर्पकत्वेनमत्वर्थलक्षणायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणविशिष्टकर्मविधानं स्वीकार्यं। उद्भिन्ना यागेन पशुं भावयेदिति। कर्मनामधेयत्वे तु उद्भिच्छब्दस्य न मत्वर्थलक्षणा मुख्यार्थ एवेत्यायजि सामा
नाधिकरण्येन तस्यान्वयसंभवात्। उद्भिदा यागेन पशुं भावयेदिति। संभवति च मुख्यार्थे लक्षणाश्रयितुं न युक्ता। सन्निकृष्टविधानं तु सामानमेध्य।
न चैवं सामेन यजेतेत्यत्रापि सोमपदस्य यागनामधेयत्वापातो गुणविधित्वे मत्वर्थलक्षणापत्तेरिति वाच्यं। सोमपदस्य लताया रूढत्वेन यागनामधे
यत्वानुपपत्तेरगत्या लक्षणाश्रयणात्। उद्भिच्छब्दस्य तु नैवं वाच्योर्थः। कश्चित्प्रसिद्धः। उद्भिद्यतेऽनेनेति योगस्य तु गुणद्रव्ययोरपि फलोद्भेदनका
रिण्युपपत्तेः। तत्सिद्धमुद्भिच्छब्दस्य मत्वर्थलक्षणाभयाद्यागनामधेयत्वमिति। चित्रया यजेत पशुकाम इत्यत्र चित्राशब्दस्य वाक्यभेदभयात्कर्मनाम
धेयत्वं। तथाहि न तावदत्र गुणविशिष्टयागविधानं संभवति। दधि मधु पयो घृतं धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यमित्यनेन विहितत्वाद्याग
स्य विशिष्टविधानानुपपत्तेः। यागस्य फलसंबंधे गुणसंबंधे च विधीयमाने वाक्यभेदः। अथ चित्राशब्दात् चित्रत्वस्त्रीत्वयोः प्रतिपत्तेः स्त्रीत्वस्य च
स्वभावतः प्राणिधर्मत्वात्प्रकृते दध्यादिद्रव्यके कर्मणि निवेशायोगात्तेन न वाक्येन प्रकृते कर्मण्यपि गुणविधानं। किंतु प्राणिद्रव्यके कर्मणि। तत्रास्य वा ३९
क्यस्यानारभ्याधीतत्वादनारभ्याधीतानां च प्रकृतौ वा द्विरुक्तत्वादिति न्यायेन प्रकृतिगामित्वात्प्राणिद्रव्यकाणां च यागानां दैक्षस्ये चेतरेष्विति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यायेनाग्नीषोमीयप्रकृतिकत्वात्तदनुवादेनानेन वाक्येनानुगुणो विधीयते। दीक्षस्य च ज्योतिष्टोमांगत्वेन स्वतंत्रफलाकांक्षाया अभावात् पशुकामपदं न
फलसमर्पकं। किं त्वग्नीषोमीयपश्वङ्गेनांगतया प्राप्तकामनानुवादः। तथा च न वाक्यभेद इति चेत्। न। तथापि दीक्षानुवादेन चित्रत्वस्त्रीत्वविधाने वाक्यभे
दात्। विशिष्टकारकविधानेपि गौरवलक्षणो वाक्यभेद एवाकारकस्यापि प्राप्तत्वेन विशिष्टविधानानुपपत्तेश्च। पशुकामविधानस्यापि स्वरसतः फ
लपरस्य कामनानुवादत्वे अप्रकृत्यापत्तेश्च। न च नियमतः परवर्जेन कामना भवति। कामनातः प्रागेव केनचिद्दत्ते पशौ तदभावात्। तथा च पशुकामपदस्य
नित्यवच्छ्रवणबाधः। दीक्षस्योत्पत्तिविशिष्टपुंस्त्वावरुद्धत्वेन तत्र स्त्रीत्वविधानानुपपत्तेश्च। आमिक्षायागानुवादेन वाजिनविधानवत्। लक्षसारंगो
ऽग्नीषोमीय इति विशेषविहितेन स्वसंनिधिपठितेन च लक्षसारंगवर्णेनावरुद्धे चित्रत्वस्यानारभ्याधीतेन सामान्यशास्त्रेण विधानानुपपत्तेश्च।
पौंचदस्याजसाप्तदरूपविधाने। अथ मा भूदग्नीषोमीयपश्वनुवादेन चित्रत्वस्त्रीत्वविधानं सारस्वती मेषीति वाक्यविहितयागांगमेष्यनुवा
देनानुगुणविधानं स्यात्। चित्रयेति स्त्रीकारकानुवादेन चित्रत्वमात्रविधानात्। न च प्राकृतेन लक्षसारंगवर्णेन नैराकांक्ष्यान्न चित्रत्वविधानं युक्त
मिति वाच्यं। उपदिष्टेन चित्रत्वेनातिदिष्टस्य वर्णान्तरस्य बाधोपपत्तेरिति चेत्। मैवं। नहि चित्रयेत्येकेन पदेन स्त्रीकारकस्योद्देशः चित्रत्वस्य च वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धानं संभवति। एकप्रसरताभंगलक्षणवाक्यभेदापत्तेः। उद्देश्यविधेयभावस्यानेकपदसाध्यत्वात्। अत एव वषट्कर्तुः प्रथमभक्ष इत्यत्र विशिष्टभक्षविधि
र्नेतु भक्षानुवादेन प्राथम्यविधिरित्युक्तं तृतीये। मेष्यनुवादेन चित्रात्वविधाने फलपदानर्थक्यापत्तेश्च। उभयविधाने वाक्यभेदात्। प्रकृतस्य च
यागस्य फलाकांक्षाया अनिवृत्तेः विश्वजिन्न्यायेन फलकल्पने गौरवं। दधिमधीत्याद्युत्पत्तिवाक्येनैतस्याधिकारवाक्यस्य प्रतिपन्नैकवाक्यताबाधे
न वाक्यभेदप्रसंगाच्च। चित्राशब्दस्य तु कर्मनामधेयत्वे प्रकृतस्य कर्मणः फलाकांक्षस्य फलसंबंधमात्रकरणान्न वाक्यभेदः। प्रकृताया द्रव्यैरन्ने
कद्रव्यकत्वेन चित्राशब्दस्य तत्रोपपत्तेः। तत्सिद्धं वाक्यभेदभयाच्चित्राशब्दस्य कर्मनामधेयमिति। अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्दस्य क
र्मनामधेयत्वं तत्प्रख्यशास्त्रात्। तस्य गुणस्य प्रख्यापकस्य प्रापकस्य शास्त्रस्य विद्यमानत्वेनाग्निहोत्रशब्दः कर्मनामधेयमिति यावत्। तथा
हि विधिना तावत्तदेव विधेयं यत्प्रकारान्तरेणाप्राप्तं। अप्राप्ते शास्त्रमर्थवदिति न्यायात्। अग्निहोत्रशब्दस्य च गुणविधित्वे यो गुणस्तेन विधेयः स
शास्त्रान्तरेण प्राप्तः। कथमिति चेत् शृणु। यदि तावदग्निर्होत्रमस्मिन्निति सप्तमीसमासमाश्रित्य होमाधारत्वेनाग्निर्विधीयते तदुच्येत तदाय
दाहवनीये जुहोतीत्यनेनैव प्राप्तत्वाद्विधानानर्थक्यं। अथाग्नये होत्रमस्मिन्निति च चतुर्थीसमासमाश्रित्याग्निरूपा देवतानेन समर्प्यत इति चेत्। न।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शाखांतरेण प्राप्तत्वात्। किं तच्छाखांतरमिति चेत्। अनके चित्। यदग्नये च प्रजापतये च सायं जुहोतीति शाखांतरेण होमानुवादेनाग्नि
प्रजापत्योर्विधानात्। नाग्निहोत्रपदं देवतासमर्पकं। नचोभयविधाने वाक्यभेदः। परस्परनिरपेक्षविधाने हि वाक्यभेदः स्यात्। अग्नये जुहोति
प्रजापतये जुहोतीति प्रत्येकं विधिव्यापारात्। चशब्दश्रवणात्तु परस्परसापेक्षस्यैव पदद्वयस्याख्यातान्वयान्न वाक्यभेदः। अत एव ऋ
त्विग्भ्यो दक्षिणां ददातीति वाक्यविहितदक्षिणानुवादेन गोश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य
द्वादशशतं दक्षिणेति वाक्येन गवादीनां विधानं दशमोक्तं संगच्छते। परस्परसापेक्षाणां गवादीनां विधाने न वाक्यभेदाभावात्। अन्यथा दक्षिणानुवा
देनानेकेषां गवादीनां विधानं नैव संगच्छतेति। अग्निप्रजापत्योश्च देवतयोः सतोः समुच्चयो न तु समुच्चितयोर्देवतात्वं। पृथक्कारकविभक्ति
श्रवणात्। चकारार्थस्य च कारार्थेनान्वयात्। तस्य प्राधान्यात्। अतश्चाग्नीषोमादिवदग्निप्रजापत्योर्देवतात्वमिति। अन्ये त्वाचार्या आहुः। अग्नये
प्रजापतये च सायं जुहोतीति वाक्यं नाग्नेः प्रापकं। होमानुवादेन प्रजापतिविधानात्। न च विनिगमनाविरहादुभयविधाने युक्तमिति वाच्यं।
विधिनाहितदेव विधीयते यस्य कालांतरेणाप्राप्तेः। तत्र यथानेन वाक्येन सायंकालो न विधीयते सायं जुहोतीति वचनांतरेण प्राप्तत्वात्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथाग्निरपि न विधीयते अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति मंत्रवर्णाद् देवताप्राप्तत्वात्। मंत्रवर्णस्यापि देवतासमर्पकत्वमस्त्येव। अत एवोपांश्या
ज्ये विष्ण्वादीनां मांत्रवर्णिकं देवतात्वमित्युक्तं। नन्वेवं प्रजापतिदेवतयाग्नेर्बाधः स्यात्। चतुर्थ्या हि प्रजापतेर्देवतात्वमवगम्यते। अग्नेस्तु
मांत्रवर्णिकं। तत्र सास्य देवतेति देवतात्वे तद्धितस्मरणवद् यद्यपि देवतात्वे चतुर्थीस्मरणं नास्ति संप्रदाने चतुर्थीति संप्रदानेन तस्याः स्मर
णात्। तथापि त्यज्यमानद्रव्योद्देश्यत्वं तावद्देवतात्वं। तच्च संप्रदानस्वरूपांतर्गतं। त्यजमानद्रव्योद्देश्यत्वे सति प्रतिग्रहीतृत्वस्य संप्रदानत्वात्।
अतश्चतुर्थीतः संप्रदानैकदेशतया देवतात्वप्रतीतिरस्त्येव। मंत्रेणैव तु न देवतात्वं प्रतीयते। किं त्वधिष्ठानमात्रं। अतश्च मंत्रवर्णश्चतुर्थीतो
दुर्बलः। यथाहुः। तद्धितेन चतुर्थ्या वा मंत्रवर्णेन वा पुनः। देवताया विधिस्तत्र दुर्बलं तु परं परं इति। अतश्च प्रबलप्रमाणबोधितप्रजापतिदेव
तया दुर्बलप्रमाणबोधिताग्नेर्बाधः स्यादिति चेत् सत्यं। स्याद् बाधो यदि प्रजापतये जुहोतीति केवलं प्रजापतिविधानं स्यात्। तद्विधीयमानस्तु प्रजा
प्रतिर्मंत्रवर्णप्राप्तमग्निमनूद्य न तत्समुच्चितो होमोद्देशेन विधीयते। समुच्चितोभयविधानापेक्षया अन्यतः प्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतिमा
त्रविधाने लाघवात्। अतश्च न बाधकत्वं। निरपेक्षविधानाभावात्। यथा च तन्मते अग्निप्रजापत्योरेकहोमोद्देशेन विधानात् तुल्यार्थत्वे न विकल्पे प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सक्के प्रजापतेर्नैपाक्षिकमग्निबाधकत्वं। समुच्चयविधानात्। एवं मंत्रवर्णप्राप्तमप्यग्निमनूद्य तत्समुच्चितप्रजापतिविधानेपि न बाधकत्वमिति तुल्यं। यत्तु
अग्नेर्मंत्रवर्णिकत्वे अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति मिश्रलिंगमंत्रवर्णबलात्सायंहोमस्य द्विदेवत्यत्वापत्तिरिति तन्न। अग्निसमुच्चितप्रजापतिविधा
नवत्सूर्यसमुच्चितस्य विधानात्प्रबलप्रमाणबोधितेन प्रजापतिना मंत्रवर्णप्राप्तस्य सूर्यस्य बाधितत्वात्। यत्त्वग्नेर्मंत्रवर्णिकत्वे प्रजापतिविधेरेकेनैव
वाक्येन सिद्धेरग्नये च प्रजापतये च सायं जुहोति सूर्याय च प्रजापतये च प्रातर्जुहोतीति वाक्यद्वयं व्यर्थमिति। तन्न। मैवं व्यर्थं यदि प्रजापतिमात्रविधा
नं विवक्षितं स्यात्। सायंहोमेऽग्निसमुच्चितप्रजापतिविधानं प्रातर्होमे सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति मंत्रवर्णप्राप्तसूर्यसमुच्चितप्रजापतिवि
धानं च विवक्षितं। न चैतदेकेन वाक्येन सिद्ध्यति। अतोर्थवद्वाक्यद्वयं। यत्तु अग्नेर्मांत्रवर्णिकत्वे मंत्रवर्णस्याग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोती
ति वाक्येन सायंहोमे विनियुक्तत्वात्। तत्प्रकाश्यस्याग्नेरपि प्रजापतिसमुच्चितस्य तत्रैव देवतात्वावगतेरग्नये चेति वाक्ये सायं शब्दो व्यर्थ इति। एवं य
त्सूर्याय चेति। वाक्ये प्रातः शब्दोपि व्यर्थ इति। किंच मंत्रवर्णेन ज्योतिष्ट्वगुणविशिष्टस्याग्नेः प्रकाशनाद्विशिष्टस्यैव देवतात्वापात इति। तदपि न। होमा
नुवादेन देवताद्वयविधानेपि मंत्रवर्णयोर्लिंगाद्देवप्राप्तिसंभवात् तद्विध्यानर्थक्यात्। मिश्रलिंगमंत्रविधिपर्युदस्तयोः प्रतिप्रसवार्थं विधानेपि तद्विधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गतयोः सायंप्रातःकालद्वयोरानर्थक्यं। विधीयमानयोर्मंत्रयोर्व्यवस्थयैव प्राप्तिसंभवात्। तत्प्रकारयोर्देवतयोर्व्यवस्थितत्वात्। अनुवादत्वो
क्तिस्तूभयत्रतुल्येति। मांत्रवर्णिकत्वेप्यग्नेः केवलस्यैव देवतात्वं न गुणविशिष्टस्य। यदग्नये चेति वाक्येऽग्नेः पूर्वोक्तिरित्यत्र च केवलस्यैवाग्नेः संकीर्त्त
नात्केवलस्यैव देवतात्वावगतेः। यथाहुरुपांशुयाजे विष्ण्वादेर्मांत्रवर्णिकत्वेपि न गुणविशिष्टस्य देवतात्वं। विष्णुरुपांशु यष्टव्य इत्यर्थवादे केवलस्यैव संकी
र्त्तनात्तद्वदिति। अनयैव मांत्रवर्णिकत्वे दोषाभावाद्देवताद्वयविधाने च गौरवापत्तेरन्यतः प्राप्तमग्निमनूद्य तत्समुच्चितः प्रजापतिरेवात्र विधीयते। होमा
नुवादेनोभयविधाने वाक्यभेदप्रसंगाच्च। न च चकारश्रवणान्न वाक्यभेद इति वाच्यं। चकारार्थो हि समुच्चयः। तं च समुच्चयं यदि चकारः प्राधान्ये
न ब्रूयात्तदा प्रधानस्यानेकविशेषणसंग्राहकत्वादारुण्यादिविशिष्टक्रयविधानइवकारकद्वयसमुच्चयविधाने वाक्यभेदो न भवेत्। न च चका
रः समुच्चेयं प्राधान्येन ब्रूते। परोपसर्जनत्वेनैवाभिधानात्। अत एव दशमे भाष्यकारैश्चकारस्य समुच्चयशब्दाद्वैलक्षण्यं प्रतिपादितं। समुच्चयश
ब्दो हि तं प्राधान्येन ब्रूते न चकारः। यदि हि प्राधान्येन ब्रूयात्तदा तत्प्रतिपन्नैः समुच्चयैः क्रियागुणैः संबध्येत। समुच्चयः शोभनः समुच्चयो द्रष्ट
व्य इतिवत्। शोभनश्च द्रष्टव्य इति प्रयोगः स्यात्। समुच्चयशब्दवच्चकारस्य प्राधान्येन समुच्चयवाचित्वे धवखदिरयोः समुच्चय इतिवत् धवखदिर

३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योऽश्चेत्यपि प्रयोगः स्यादिति। अतश्चकारः समुच्चयं प्राधान्येन ब्रूते। येन प्रधानस्यैकस्य विधानान्न वाक्यभेदो भवेत्। किंतु कारकद्वयोपसर्जनत्वेनैव
सतं ब्रूते। समुच्चितौ अग्निप्रजापती इति। प्रधानद्वयविधाने च वाक्यभेदः स्यादेव। यथा ग्रहोद्देशेन सम्मार्गैकत्वविधाने। यद्यपि च चकारः समुच्चयं
प्राधान्येन ब्रूयात्तथापि तस्य कारकद्वयं प्रति प्राधान्यमुपपन्नं। विभक्त्यभिहितस्य कारकद्वयस्य क्रियोपसर्जनत्वेन समुच्चयोपसर्जनत्वाभावात्। लदंता
दिशा द्वैरूपस्थितं हि कारकक्रियातोऽन्येन संबध्यते। ×नु×कारकसमुच्चयः करणसमुच्चयद्वाते विभक्त्यभिहितं तु क्रिययैव। कारकाणां तयैवान्वया
त्। अतश्चकारेणोच्यमानः सकारकोपसर्जनत्वेनैवोच्येत। कारकद्वयं च प्रधाने। एकोद्देशेन च प्रधानद्वयविधाने वाक्यभेद एव। यथाहुः। अनेकपदसं
बद्धं यद्येकमपि कारकं। तथापि तदनारस्तैः प्रत्ययैर्न विधीयते इति। यच्च यथा दक्षिणानुवादेन गवादीर्नामनेकेषां विधाने न वाक्यभेदस्तथा कारकद्वयविधा
नेऽपीति। तन्न। नहि गोश्चाश्वश्चेत्यस्मिन्वाक्ये दक्षिणानुवादेन गवादयो विधीयन्ते। उक्तरीत्या वाक्यभेदापत्तेः। चकारश्रवणेन कथंचित्तत्परिहारेऽपि गवा
दीर्नामनेकेषां द्वादशशतसंख्यायाश्च विधाने वाक्यभेद एव। अध्वर्यवे शाखायां गोश्चेत्यादेः तस्य द्वादशशतमित्यंतस्य सहश्रुतत्वेन चास्यैकवाक्यत्व
मित्युक्तं दशमे। अतो नेन वाक्येनोभयविशिष्टा दक्षिणैव विधीयते। विशिष्टविधानाच्च न वाक्यभेदः। अत एव पार्थसारथिमिश्रैर्दशमे तत्रं तत्र सो भु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यविशिष्टा विधीयते। अनेकगवाद्यात्मिकैका दक्षिणा विधीयत इति चोक्तं। न चैवमृत्विग्भ्यो दक्षिणां ददातीत्यस्यानर्थक्यं। तस्यानुवादत्वात्। ऋत्विक्सं
बंधपरत्वाद्वा। दक्षिणाशब्दसामर्थ्याद्धि ऋत्विजां चमसाध्वर्य्वादीनां च तत्संबंधः स्यात्। एतद्वाक्यसत्वे च न भवति। ऋत्विक्शब्दस्य ब्रह्मादिगत
ऋतुयजननिमित्तत्वेन चमसाध्वर्यूणां च ऋत्विक्त्वाभावस्य तृतीये उक्तत्वात्। अतश्च गौश्चाश्वश्चेत्यस्मिन्वाक्ये विशिष्टविधानान्न वाक्यभेदः। य
दग्नये च प्रजापतये च सायं जुहोतीति तु न विशिष्टविधानं। होमस्याग्निहोत्रं जुहोतीत्यनेन प्राप्तत्वात्। अतश्च होमानुवादेन समुच्चितोभयविधा
ने वाक्यभेदादग्नेरप्राप्तेश्चानेन वाक्येन देवताद्वयं विधीयते। किंतु मंत्रवर्णप्राप्तमग्निमनूद्य तत्समुच्चितः प्रजापतिर्होमोद्देशेन विधीयते। अतश्चैने
दमग्नेः प्रापकं किंतु मंत्रवर्णादेवाग्नेः प्राप्तत्वान्नाग्निहोत्रपदं देवतासमर्पकं किं तर्हि नामधेयं। तत्सिद्धमेतत्॥ तत्प्रख्यशास्त्रादग्निहोत्रश
ब्दस्य कर्मनामधेयत्वमिति। एवं प्रयाजेषु समिदादिदेवतानां समिधः समिधोऽग्न आज्यस्य व्यंत्वित्यादिमंत्रवर्णेभ्यः प्राप्तत्वात्समिधो यजतीत्या
दिषु समिदादिशब्दास्तत्प्रख्यशास्त्रात्कर्मनामधेयं। यथाहुः। विधित्सितगुणप्राप्तिः शास्त्रमन्यद्यतस्त्विह। तस्मात्तत्प्रापकं व्यर्थमिति नाम
त्वमिष्यत इति दिक्। श्येनेनाभिचरन्यजेतेत्यत्र श्येनशब्दस्य कर्मनामधेयत्वं तद्व्यपदेशात्। तेन व्यपदेशः उपमानं तदन्यथानुपपत्त्येति यावत्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथाहि। यद्विधेयं तस्य स्तुतिर्भवति तद्यद्यत्र श्येनो विधेयः स्यात्तदार्थवादेस्तस्यैव स्तुतिः कार्या। न च यथा वै श्येनो निपत्यादत्त एवमयं द्विषंतं भ्रातृव्यं
निपत्यादत्त इत्यनेनार्थवादेन श्येनः स्तोतुं शक्यः। श्येनोपमानेनार्थात्तत्स्तुतेः क्रियमाणत्वात्। न च श्येनोपमानेन स एव स्तोतुं शक्यते। उपमानो
पमेयभावस्य भिन्ननिष्ठत्वात्। यदा तु श्येनसंज्ञको यागो विधीयते तदार्थवादेन श्येनोपमानेन तस्य स्तुतिः कर्तुं शक्यत इति श्येनशब्दस्य तद्व्य
पदेशाद्यागनामधेयत्वं। तत्सिद्धं निमित्तचतुष्टयान्नामधेयत्वं। उत्पत्तिशिष्टगुणबलीयस्त्वमपि पंचमं नामधेयत्वे निमित्तं केचिदाहुः। वैश्वदेवे
न यजेतेत्यत्र वैश्वदेवशब्दस्य कर्मनामधेयत्वमुत्पत्तिशिष्टगुणबलीयस्त्वात्। उक्तमत्वर्थलक्षणादिप्रकारचतुष्टयासंभवात्। तथाहि। न ताव
न्मत्वर्थलक्षणाभयान्नामत्वं वक्तुं युक्तं। वैश्वदेवेनेति तद्धितेनैव मत्वर्थस्य यागस्योक्तत्वात्। सास्य देवतेत्यस्मिन्नर्थे हि तद्धितस्मरणं। तत्रास्य शब्द
स्य तद्धितांतर्गतस्य यद्यपि सूक्तहविर्विशेषो रितिस्मृतेः सूक्ते हविषि वा मुख्यत्वमवगतं तथापि सर्वनाम्नामुपस्थितवाचित्वात्सूक्तहविषोश्चात्रानुप
स्थितत्वाद्यजेतेत्युपस्थितयागमेवास्य शब्दोऽभिधत्त इति न यागे मत्वर्थलक्षणा। विश्वेदेवरूपैकदेवताविधानाच्च न वाक्यभेदः। नापि तत्प्रख्यशास्त्रा
न्नामत्वं। यत्र हि विधित्सितो गुणोऽन्यतः प्राप्तस्तत्र तत्प्रख्यशास्त्रान्नामत्वं यथाग्निहोत्रशब्दे। अत्र चाग्नेयादयोऽष्टौ यागाः प्रकृताः। तत्रामिक्षायागेग्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्यपि विश्वेदेवाः प्राप्ताः वैश्वदेव्यामिक्षेति तथापि सप्तसु तेषामप्राप्तत्वाद्वैश्वदेवेन यजेतेत्यनेन तत्र तद्विधानेन तत्प्रख्यशास्त्रमन्यत्। येन तद्व्यशान्नामत्वं स्या
त्। न चामिक्षायागस्यैवैतन्नामेति वाच्यं। वैश्वदेवेन यजेतेति वाक्यवैयर्थ्यापत्तेः। वैश्वदेवशब्दस्यामिक्षायागमात्रनामत्वे सर्व एव यागो नेनानूद्यत इति वाच्यं।
न च तदनुवादे नास्ति किंचित्फलं। प्राचीनप्रवणे वैश्वदेवेन यजेतेति विधीयमानस्य प्राचीनप्रवणदेशस्य विनाप्येतद्वाक्यमामिक्षायाग एव संबंधोपपत्तेः।
विश्वेदेवसंबंधात्तस्य। आग्नेयाद्यशेषप्रकृतयागनामत्वे तु न वैश्वदेवेन यजेतेति वाक्यानर्थक्यं। तदा ह्यनेनाष्टौ यागा अनूद्यन्ते अनुवादेन च फलं प्रतीत्या
संसृष्टत्वात्सप्तसु दित्सानामष्टानामपि वैश्वदेवशब्दो नामधेयं सिध्यति। एवं च प्राचीनप्रवणे वैश्वदेवेन यजेतेत्यत्र वैश्वदेवशब्देनाष्टौ यागाननूद्य प्राचीन
प्रवणो विधानं तत्र सिद्धं भवति। तद्वाक्याभावे ऽनेन वाक्येनामिक्षायाग एव प्राचीनप्रवणसंबंधः स्यात्। अतश्चाष्टसु यागेषु प्राचीनप्रवणदेशसंबंध
एवैतद्वाक्यप्रयोजनं। एवं च वैश्वदेवशब्दो ऽष्टानां नामधेयं। न च तत्र तत्प्रख्यशास्त्रं ×देश× निमित्तं संभवति। सप्तसु विश्वेदेवाप्राप्तेः। अतो न वैश्वदेव
शब्दस्य तत्प्रख्यशास्त्रान्नामधेयत्वमिति। नापि तद्व्यपदेशात्। तादृशस्य व्यपदेशस्यानुपलंभात्। अतश्च वैश्वदेवशब्दस्य नामधेयत्वे उक्तप्रकार ८०
चतुष्टयस्यानिमित्तत्वादुत्पत्तिशिष्टगुणबलीयस्त्वमेव निमित्तं। तथाहि वैश्वदेवेन यजेतेत्यत्र न तावदप्रकृतकर्मानुवादेन देवताविधानं संभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्नेरवापत्तेः अष्टौ रुद्रवीषी ति अनन्यगतिकलिंगविरोधात्। अतोनेन वाक्येन

वति तेषा मत्रानुपस्थितेः नापि देवताविशिष्टकर्मांतरविधानं संभवति गौरवापत्तेः अष्टौ रुद्रवीषी ति अनन्यगतिकलिंगविरोधात्। अतोनेन वाक्येन नचतत्संभव

प्रकृतकर्मानुवादेन देवताविधीयतइतिवक्तव्यं। तत्रामिक्षायागे विश्वेदेवप्राप्तेः सप्तस्वयागेष्व नेनवाक्येनविश्वेदेवाविधीयंतेइतिवक्तव्यं। नचतत्संभव

तितेषामुत्पत्तिशिष्टाग्न्याद्यवरोधात्। आकांक्षयाहिसंबंधोभवति। आग्नेयादियागानांहिदेवताकांक्षायामुत्पत्तिशिष्टैरग्न्यादिभिरेवनिरस्तेतिनतत्र

विश्वेदेवविधानयुक्तं। अतश्चोत्पत्तिशिष्टगुणबलीयस्त्वाद्वैश्वदेवशब्दस्यकर्मनामधेयत्वमिति। यथाकुः गुणांतरावरुद्धत्वान्नावकाशोगुणोपरः। वि

कल्पोपिनवैषम्यात्तस्मान्नामैवयुज्यतइति॥ अन्येत्वाचार्या आहुः। यः शब्दो यत्रकर्मणियद्रूपसंबंधंबोधयतिस्वेनसंबंधः। शास्त्रांतरप्रतिपन्नः

तदातस्यशब्दस्यतन्नामधेयत्वंतत्प्रख्यशास्त्रात्। तच्चशास्त्रांतरंविधिर्वार्थवादोवेत्यत्रनादरः। तत्राग्निहोत्रशब्दोऽग्निसंबंधबोधकंशास्त्रांतरंविधिरेववै

श्वदेवसंबंधंकर्मणिबोधयति। विश्वेदेवसंबंधश्चाष्टस्वयद्विश्वेदेवाः समयजंत। तद्वैश्वदेवस्यवैश्वदेवत्वमित्यर्थवादादवगतः। नचविधिरेवतत्प्रख्यशास्त्रंनार्थ

वादइत्यत्रकिंचित्प्रमाणमस्ति। अतएवज्योतिष्टोमेनस्वर्गकामोयजेतेत्यत्रज्योतिष्टोमशब्दएतानिवावतानिज्योतींषियएतस्यस्तोमाइत्यर्थवादादवगतंज्योतिः

संबंधनिमित्तीकृत्यसोमयागेप्रवर्त्तमानस्तत्प्रख्यशास्त्रात्तन्नामधेयंभवति। एवंप्रकृतेपिद्रष्टव्यं। पंचमप्रकारकल्पनेप्रमाणाभावात्। अतएववैश्वदेवाधिकर

81

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या०प्र०

पेवार्त्तिककारैरेवमुपसंहृतं। तत्प्रख्यन्यायेनसर्वेषांनामधेयत्वमिति। यच्चोत्पत्तिशिष्टगुणबलीयस्त्वमुक्तं। तद्गुणविध्यसंभवेयुक्तमभ्युच्चयमात्रं। तत्सिद्धंतत्प्रख्य
शास्त्राद्वैश्वदेवशब्दस्यकर्मनामधेयत्वमिति। ननुपशुसोमाधिकरणे। ऐंद्रवायवंगृह्णातीत्यादौनयजिकल्पनंसोमेनयजेतेतिप्रत्यक्षयजिश्रुतेरित्युक्तं। ते
नन्यायेनवैश्वदेव्यामिक्षेत्यत्रापियजिकल्पनंमास्तु। वैश्वदेवेनयजेतेत्यत्रप्रत्यक्षयजिश्रुतेः। एवंचानेनवाक्येनदेवताविशिष्टकर्मविधानमस्तु तस्यच
द्रव्याकांक्षायांवैश्वदेव्यामिक्षेतिद्रव्यविधानमस्तु। एवंचनवाक्यद्वयस्याप्यनुवादत्वं। नाप्यष्टौहवींषीत्यनन्यगतिकलिंगविरोधोभवेदितिचेत्। मैवं।
वैश्वदेव्यामिक्षेत्यत्रयज्यकल्पने आमिक्षा किमनुवादेनविधीयतइतिवक्तव्यं। विश्वेदेवानुवादेनविधानेद्रव्यस्यदेवतांगत्वमेवस्यान्नयागांगत्वं। किंचवैश्वदेवी
शब्दोदेवता तद्धितत्वादामिक्षांतत्वेनब्रूतइत्युक्तं। तत्रविश्वेदेवानुवादेनद्रव्यविधानंवैश्वदेवीशब्देनैवकर्त्तव्यंपदश्रुतेः। यथाभावनायांकरणसमर्पणंधा
तुनैवक्रियतेपदश्रुतेनेत्युपपादनेत्युक्तंभावार्थाधिकरणेतद्वत्। तत्रवषट्कर्त्तुः प्रथमभक्षइतिवत् एकप्रसरताविरोधः। अतोयागानुवादेनद्रव्यविधानार्थंवै
श्वदेव्यामिक्षेत्यत्रयजिकल्पनंतावदवश्यंकर्त्तव्यं। तथाचपशुसोमाधिकरणन्यायवैषम्यं। ऐंद्रवायवंगृह्णातीत्यत्रदेवताविशिष्टग्रहणविधानेनयज्यकल्पनात्।
यजिकल्पनेचवैश्वदेव्यामिक्षेत्यत्रैवद्रव्यदेवताविशिष्टकर्मविधानंयुक्तं। रूपद्वयश्रवणात्। एवंचाग्नेयोष्टाकपालःसौम्यश्चरुरित्यादिवाक्यैर्वैश्वदेव्यामि

तृं: ८१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षेत्यस्य वाक्यस्य प्रायपाठो रक्षितो भवति। अन्यथा हि तेषु सर्वेषु द्रव्यदेवतासंबंधकल्पितयागविधानमन्यच्च द्रव्यविधानमिति वैरूप्यं प्रसज्येत। किंच वै
श्वदेवेन यजेत्यत्र वैश्वदेवशब्दस्य देवतासमर्पकत्वे यद्विश्वे देवाः समयजंत तद्वैश्वदेवस्य वैश्वदेवत्वमित्येतस्यार्थवादस्यात्यंतमेव निरालंबनत्वं स्यात्। ए
तदर्थवादाद्धि वैश्वदेवशब्दो विश्वेदेवकर्तृकत्वेन कर्मणि प्रवृत्त इति ज्ञायते। तद्देवतासमर्पकत्वे विरुध्यते। किंच वैश्वदेवेन यजेतेत्यस्य यागविधित्वे आमिक्षाया
नोत्पत्तिशिष्टत्वं। तथा च तया न वाजिनं बाधितुं शक्यते इत्युभयोरप्यामिक्षावाजिनयोर्यागांगत्वं स्यात्। तथा च विकल्पः स चाष्टदोषदुष्ट इति। तस्माद्वैश्वदेव्या
मिक्षेत्यत्रैव यागविधानं। इतरस्य त्वनुवादत्वं। अनुवादत्वे च यथा नानर्थक्यं तथोक्तमित्यास्तां तावत्। तत्सिद्धं वैश्वदेवशब्दस्य कर्मनामधेयत्वं। तदेवं नि
रूपितं मत्वर्थलक्षणादिप्रकारचतुष्टयनिरूपणेन नामधेयस्य विधेयार्थपरिच्छेदकतयार्थवत्त्वं॥ ॥ ॥श्रीशंकरो जयति॥ ॥अनर्थहेतुकर्मणः प्र
काशात्पुरुषस्य निवृत्तिकरत्वेन निषेधानां पुरुषार्थानुबंधित्वं। तथा हि। यथा विधयः प्रवर्तनामभिदधतः स्वप्रवर्तकत्वनिर्वाहार्थं विधेयस्य यागादेः श्रेयः
साधनत्वमाक्षिपंतः पुरुषं तत्र प्रवर्तयंति। एवं न कलंजं भक्षयेदित्यादयो निषेधा अपि निवर्तनामभिदधतः स्वनिवर्तकत्वनिर्वाहार्थं निषेध्यस्य कलंज
भक्षणादेरनर्थहेतुत्वमाक्षिपंतः पुरुषं ततो निवर्तयंति। ननु कथं निषेधानां निवर्तनाप्रतिपादकत्वं। यावता न भक्षयेदित्यत्र हंतव्य इत्येवमादौ अव्यवधाने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नञर्थस्याभावस्यधात्वर्थेनान्वयेधात्वर्थवर्जनेकर्त्तव्यत्वेनसर्वत्रवाक्यार्थःप्रतीयते।ततश्चयथायजेतेत्यादौयागकर्तव्यतावाक्यार्थएवंनिषेधेषुतत्तद्धात्व
र्थवर्जनकर्त्तव्यतावाक्यार्थोननिवर्त्तनेतिचेत्।मैवं।अव्यवधानेपिधात्वर्थस्यप्रत्ययार्थोपसर्जनत्वेनोपस्थितस्यनञर्थेनान्वयायोगात्।नह्यन्योपसर्जनमन्येन।
न्वेति।माभूज्जैत्रेपुरुषमानयेत्यत्रराज्ञोआनयनान्वयित्वं।ततश्चाव्यवधानेपिनञर्थस्यनधात्वर्थेनान्वयः।आरुण्यस्येवएकहायन्या।नापिकलिं
ङादिपदार्थैरन्वयः।तेषामपिकारकोपसर्जनतयोपस्थितत्वेनभिन्नपदस्यनञोर्थेनान्वयायोगात्।एकहायिन्याइवारुण्येन।अतश्चान्येनान्वया
योगान्नञर्थःप्रत्ययार्थेनसंबध्यते।तस्यप्राधान्यात्।क्रयभावनयेवारुण्यादीनि।तत्रापिनाख्यातांशवाच्यार्थ्याभावनया।तस्याअपिलिंगत्वांशवा
च्यप्रवर्त्तनोपसर्जनत्वेनोपस्थितत्वात्।अतोलिङ्त्वांशमादायनञ्संबध्यते।तस्यसर्वापेक्षयाप्राधान्यात्।नञर्थश्चैषस्वभावोयत्स्वसंबंधिनस्तत्प्र
तिपक्षबोधकत्वं।नास्तीत्यत्रह्यस्तीतिसत्त्वशब्देनसंबध्यमानोनञ्सत्त्वप्रतिपक्षंअसत्त्वंगमयति।तदिहलिङर्थस्तावत्प्रवर्त्तना।अतस्तेनसंब
ध्यमानोनञ्प्रवर्त्तनाप्रतिपक्षंनिवर्त्तनांगमयति।विधिवाक्यश्रवणेअयंमांप्रवर्त्तयतीतिप्रवर्त्तनाप्रतीतिवन्निषेधवाक्यश्रवणेअयंमांनिव
र्त्तयतीतिनिवृत्त्यनुकूलव्यापाररूपनिवर्त्तनाख्यायाः।प्रतीतेः।अतश्चसर्वत्रनिषेधेषुनिवर्त्तनैववाक्यार्थः।एवंचविधिनिषेधयोर्भिन्नार्थत्वंसिद्धंभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वति। हननादिवर्जनकर्तव्यतावाक्यार्थपक्षेतु कर्तव्यतायाएवोभयत्र प्रतिपाद्यत्वात्तयोरेकार्थत्वंस्यात्। तच्च नयुक्तं। यथाहुः। अंतरंयाद्दशंलोके
ब्रह्महत्याश्वमेधयोः॥ दृश्यते तादृगेवैवंविधानप्रतिषेधयोरिति। तथा। फलबुद्धिप्रमेयाधिकारिबोधकभेदतः। पंचधात्वंतभिन्नत्वाद्वेदोविधिनि
षेधयोरिति। यन्मतेइष्टसाधनत्वलिङर्थस्तन्मते लिङ्संसृष्टोनञिष्टसाधनत्वप्रतिपक्षंअनिष्टसाधनत्वंगमयति। सर्वथापितु नञः प्राधान्यात्प्र
त्यये नान्वयः। यदातु तदन्वये किंचिद्बाधकंतदाऽगत्याधात्वर्थेनान्वयः। तच्चबाधकंद्विविधं। तस्यव्रतमित्युपक्रमोविकल्पप्रसक्तिश्च। अनेन
चबाधकद्वयेननञ्युक्तेषुवाक्येषुपर्युदासाश्रयणंभवति। तदभावेनिषेधएव। पर्युदासः सविज्ञेयोयत्रोत्तरपदेननञ्। प्रतिषेधः सविज्ञे
यः क्रिययासहयत्रनञ्। इतिच तयोर्लक्षणं। नेक्षेतोद्यन्तमादित्यमित्यादौपर्युदासाश्रयणं। तस्यव्रतमित्युपक्रमात्। तथाहि। व्रतशब्देनक
र्तव्योर्थउच्यते। अतश्चास्तान्तकस्यकर्तव्यार्थानांवक्तव्यत्वेनोपक्रमात् किंतत्कर्तव्यमित्यपेक्षायामयंनेक्षेतोद्यन्तमित्यादौकर्तव्यएवार्थोवक्त
व्यः। आकांक्षिताभिधानात्। अर्थान्तरोक्तौचपूर्ववाक्यस्यसाकांक्षत्वेनाप्रामाण्यप्रसंगात्। नहिकर्तव्यार्थस्यवक्तव्यत्वेनोपक्रमेऽयेचतदनभिधा
नेपूर्ववाक्यस्यनिराकांक्षत्वंभवति। नचसाकांक्षस्यप्रामाण्यं। गौरश्वः पुरुषइत्यादावपिप्रसंगात्। किंचनेक्षेतेत्यस्योपक्रमेणप्रतीयमानं। एक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाक्यता च न स्यात्। अर्थान्तरोक्तेः। अतश्चास्मिन् वाक्ये कश्चित्कर्तव्य एवार्थो वक्तव्यः। तदुक्तौ च नञः प्रत्ययेन संबंधो घटते। तत्संबंधे कर्तव्यार्थो
क्तेरनुपपत्तेः। प्रत्ययावतारितो नञ् धातुना संबध्यते। तत्संबंधे च नञः प्रतिषेधकत्वं। विधायकसंबंधे नैव तस्य प्रतिषेधकत्वात्। प्रतिषेधक
त्वस्य विधायकत्वप्रतिपक्षत्वात्। नामधातुयोगे तु नञः प्रतिषेधकत्वं तयोरविधायकत्वात्। यथाहुः। नामधात्वर्थयोगी तु नैव नञ् प्रतिषेधकः। वदत्य
ब्राह्मणाधर्मौ चान्यमात्रविरोधिनाविति। अतश्च नेक्षेतेत्यत्र नञो धातुयोगान्नञो क्षितिभ्यां ईक्षणविरोधी कश्चनार्थः प्रतिपाद्यते। ननु तदन्यतद्विरु
द्धतदभावेषु नञ् इति सत्यपि स्मरणे नञः संसृष्टाऽभाव एव शक्तिः। लाघवात्। न तदन्यत्वद्विरुद्धयोः। तयोरभावघटितत्वेन गौरवात्। अनेकार्थस्य चा
न्याय्यत्वात्। अतो न ञो धातुयोगे धात्वर्थाभावबोधकत्वमेव। न तु तद्विरुद्धार्थबोधकत्वमिति चेत्। सत्यं। नञो अभाव एव। शक्तिः। स्मरणं तु प्रतीत्यभि
प्रायं न शक्त्यभिप्रायं। नामधात्वर्थयोगी। त्यपि प्रतीत्यभिप्रायं। तथापि नेक्षेतेत्यत्र प्रत्ययस्य नञा असंबंधात्तेन नावश्यं कश्चिदर्थो विधायः। तत्र न च॥
तावद् धात्वर्थो विधातुं शक्यते। न भात्तदभावबोधनात्। नापि तदभावो विधातुं शक्यते ऽभावस्याविधेयत्वात्। अतश्च नञो क्षितिभ्यां विधानयोग्यः 63
कश्चनेक्षणविरोधी अर्थो लक्षणया प्रतिपाद्यते। स्वेक्षणविरोधी लक्ष्यमाणः पदार्थो नेक्षेदिति अनीक्षणसंकल्पः। तस्येक्षणविरोधत्वात्। सत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्पिपदार्थांतरस्येक्षणाविरोधित्वे सर्वक्रियाविनाभूतत्वेन संकल्पस्यैव लक्षणा स एव नेक्षेतेत्यत्र कर्त्तव्यतया विधीयते। अनीक्षणसंकल्पेन भावयेदिति। भा
व्याकांक्षायां चैतावताहनेनसा वियुक्तो भवतीति वाक्यशेषावगतः पापक्षयो भाव्यतयासंबध्यते। एवं चात्र पापक्षयार्थसंकल्पस्य कर्त्तव्यतया विधानात्त
स्य व्रतमित्यनेनैकवाक्यता सिद्धा भवति। तत्सिद्धं नेक्षेतेत्यत्र तस्य व्रतमित्येकपक्रमात्पर्युदासाश्रयणमिति। नानुयाजेषु येयजामहं करोतीत्यत्र विकल्पप्र
सक्त्या तदाश्रयणं। तथाहि। यद्यत्र प्रधानसंबंधलाभान्नञः प्रत्ययसंबंधः स्वीक्रियते। तथा सत्यनेन वाक्येन नानुयाजेषु येयजामहः प्रतिषिध्यत इति व
क्तव्यं। अनुयाजेषु येयजामहं न कुर्यादिति। न च तत्र तस्य प्रतिषेधः प्राप्तिं विनासंभवति। प्राप्तिसापेक्षत्वात्प्रतिषेधस्य। ए अतएव नांतरिक्षेन दिवीत्यस्य न प्रतिषे
धत्वं। अंतरिक्षे चयनाप्राप्तेः। अतएव न ब्राह्मणो हंतव्य इत्यस्य न नित्यवद्धननिवर्त्तकत्वमुपपद्यते। सर्वो हि पुरुषः कदाचिद्धननादौ प्रवर्त्तते। कदाचिच्च रागाद्य
भावे न प्रवर्त्तते। तत्र यदि निषेधस्य प्राप्तिसापेक्षत्वं न स्यात्तदा गाविरोधाय हननादावप्रवृत्तं प्रत्येवं रा। स्वप्रामाण्योपपत्तौ रागादिना हननादौ प्रवृत्तेन पुं
सा नततो निवर्त्तितव्यं। प्राप्तिसापेक्षत्वे तु स्वयमप्रवृत्तं प्रतिप्रसक्त्यभावेन निषेधशास्त्राप्रवृत्तेः रागादिना प्रवृत्तं प्रत्येव प्राप्तिनिमित्तरागबाधेन निषेधशा
स्त्रप्रवृत्तेर्युक्ता प्रवृत्तस्य ततो निवृत्तिः। अतश्च ब्राह्मणो न हंतव्य इत्यस्य निषेधस्य निवृत्तिनियमबोधकत्वं। व्रीहीनवहन्यादित्यस्यैवावघातनियमबोधक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं। यथा खलु व्रीहीन्न हन्यादिति शास्त्रं वैतुष्यार्थं अवघाते स्वयमेव प्रवृत्तं पुरुषं प्रति न प्रवर्त्तते वैयर्थ्यात्। किंतु दलेनादौ प्रवृत्तं प्रति। एवं न हन्यादिति शास्त्रं हन
नात्स्वयं निवृत्तं पुरुषं प्रति न प्रवर्त्तते वैयर्थ्यात्। किंतु हनने प्रवृत्तं पुरुषं प्रति न प्रवर्त्तते वैयर्थ्यात्। किंतु हनने प्रवृत्तं पुरुषं प्रति। कर्त्तव्यत्वेन प्रसक्तस्य प्रतिषे
धात्। यत्कर्त्तव्यं तन्नेति। अतश्च प्राप्तिसापेक्षत्वात्प्रतिषेधानां अनुयाजेषु येयजामहं प्रतिषेधे तस्य तत्र प्राप्तिर्वक्तव्या। सा न तावद्धननादाविव रागतः संभवति।
अतो यजतिषु येयजामहं करोतीति शास्त्रात्सा वक्तव्या। शास्त्रात्प्राप्तस्य च प्रतिषेधे विकल्पः स्यात्। शास्त्रेण प्राप्ति निमित्त रागस्येव शास्त्रान्तरस्यात्यन्तबाधा
योगात्। न च पदशास्त्रेणाहवनीयशास्त्रस्येवानुयाजेषु इति विशेषशास्त्रेण यजतिषु येयजामहं करोतीति सामान्यशास्त्रस्य बाधः स्यादिति वाच्यं। शास्त्रयो
र्हि तत्र बाध्यबाधकभावो यत्र परस्परान्निरपेक्षता। न हि पदशास्त्रस्य स्वार्थविधानार्थमाहवनीयशास्त्रापेक्षास्ति। निषेधशास्त्रस्य तु प्रसक्त्यर्थं यजतिषु येय
जामहं करोतीति विधेरस्त्यपेक्षा। एवं च निषेधशास्त्रस्य विशेषविषयत्वेन प्राबल्यवत् विधिशास्त्रस्यापि उपजीव्यत्वेन प्राबल्यमस्तीति न निषेधेन विधेरत्यंतं
बाधो युक्त इति विहितप्रति। षिद्धत्वाद्विकल्पः स्यात्। स च न युक्तः। विकल्पे हि पक्षे शास्त्रस्याप्रामाण्यं भवति। न खल्वनुयाजेषु येयजामहकरणे नानुयाजे ८८
ष्वित्यस्य प्रामाण्यं संभवति। व्रीह्यनुष्ठानसमय इव यवशास्त्रस्य द्विरदृष्टकल्पना च स्यात्। विधेर्हि एवं ज्ञायते। यदनुयाजेषु येयजामहकरणे कश्चिनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पकारो भवतीति। निषेधाच्च तदकरणादिति ज्ञायते। अन्तवदनाकरणादिव दर्शपूर्णमासयोः। स चोपकारोऽदृष्टरूप इति द्विरदृष्टकल्पनाप्रसंगः। अतश्च वि
कल्पो न युक्तः। प्रतिषेधाश्रयणे च तदाप्तेर्नेतदाश्रयणं। किंतु नञोऽनुयाजशब्देन संबंधमाश्रित्य पर्युदास आश्रियते। नञनुयाजशब्दाभ्यामनुयाजव्यतिरि
क्तलक्षणात्। अनुयाजव्यतिरिक्तेषु येयजामहं करोतीति। अत्र च वाक्ये येयजामहः कर्तव्यतया न विधीयते। यजतिषु येयजामहं करोतीत्यनेनैव
व विहितत्वात्। किंतु सामान्यशास्त्रविहितयेयजामहानुवादेन तस्यानुयाजव्यतिरिक्तविषयता विधीयते। यद्यजतिषु येयजामहं करोतीति तदनुयाजव्यति
रिक्तेष्विति। एवं च सामान्यशास्त्रस्य विशेषापेक्षित्वेन नानुयाजेष्वित्यनेनानुयाजव्यतिरिक्तविषयसमर्पणादनुयाजव्यतिरिक्तेषु येयजामहः।
कर्तव्यतया प्राप्तः। अनुयाजेषु तु स न कर्तव्यतया प्राप्तो न चाप्रतिषिद्ध इति न विकल्पः। लक्षणया चानुयाजव्यतिरिक्तविषयसमर्पणान्नानुयाजे
ष्विति वाक्यस्य न प्रामाण्यं। अतश्च पर्युदासाश्रयणे न किंचिद्बाधकं। तत्सिद्धं नानुयाजेष्विति वाक्ये विकल्पभयात्पर्युदासाश्रयणमिति। ननु पर्युदासा
श्रयणे यजतिषु येयजामहं करोतीति शास्त्रेण यागसामान्ये प्राप्तस्य येयजामहस्य नानुयाजेष्वित्यनेनानुयाजव्यतिरिक्ते संकोच तात्पर्युदास
स्योपसंहारादभेदः स्यात्। उपसंहारे हि सामान्ये प्राप्तस्य विशेषे संकोचो भवति। यथा पुरोडाशं चतुर्धा करोतीति पुरोडाशसामान्ये प्राप्तं चतुर्धाक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्या०५७

रूपंआग्नेयंचतुर्धाकरोतीतिआग्नेयंसंकोच्यतइतिचेत्‌नतन्मात्रसंकोचार्थत्वादुपसंहारस्यतदन्यमात्रसंकोचार्थत्वात्पर्युदासस्येतिकेचित्‌।अ
न्येतूपसंहारोनामसामान्यतःप्राप्तस्यविशेषेसंकोचनरूपोव्यापारविशेषोविधेः।पर्युदासस्तुपर्युदासःसंविज्ञेयोयत्रोत्तरपदेननञ्इत्यभि
युक्तोक्त्याप्रत्ययातिरिक्तेनधातुनावानाम्नावानञःसंबंधः।अतोऽनयोस्तावत्स्वरूपतःस्पष्टएवभेदः।एवंसत्यप्यभेदआशंक्येतयदिपत्रप
र्युदासस्तत्रावरूपंउपसंहारःस्यात्‌।नचैतदस्ति।नेक्षेतोद्यन्तमित्यादौसत्यपितस्मिन्नुपसंहाराभावात्‌।नहितत्राग्नेयेचतुर्धाकरणमिवसाम)
न्येप्राप्तंकिंचिद्विशेषेसंकोच्यते।पापक्षयोद्देशेनानीक्षणसंकल्पमात्रविधानात्‌।प्रकृतोदाहरणेतुयजिसामान्येप्राप्तस्ययेयजामहस्यानुया
जव्यतिरिक्तेषुसंकोचनाद्यदिविधेरुपसंहारविधित्वंभवतिनैतावताकिंचिद्विरुध्यते।विध्यभावेहिकथंविधिकार्यमुपसंहारःपर्युदासेनक्रियत
इतिभवतिविरोधः।नचात्रविधिर्नास्ति।नञोऽनुयाजपदसंबंधेनविधेर्विधायकस्याव्याघातात्‌।अत्रहिपर्युदासोऽननुयाजव्यतिरिक्तविषयसम
र्पकः।आग्नेयपदवत्‌उपसंहारकस्तुविधिरेव।नचात्रतन्मात्रसंकोचाभावान्नोपसंहारइतिवाच्यं।तन्मात्रसंकोचइतिकोर्थः।आग्नेयमात्रेसंको
चोवा।सामान्यप्राप्तस्यविशेषमात्रसंकोचोवा।आद्येऽनारभ्याधीतस्यपदस्यमित्रविंदादिप्रकरणस्थेनवाक्येनोपसंहारोनस्यात्‌।आग्नेयु

५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संकोचाभावात्। द्वितीये च तु धीकरणस्य पुरोडाशमात्रे प्राप्तस्याग्नेये संकोचवत्। अनुयाजानुयाजसाधारण्येन प्राप्तस्यानुयाजेषु संकोचादुप
संहारः स्यादेव। एतावांस्तु विशेषः। आग्नेयादिवाक्येषु आग्नेयादयो विशेषाः स्वपदोपस्थापिताः प्रकृते तु पर्युदासेन तस्योपस्थितिरिति। उपसंहारन्याय
स्त्वविशिष्ट एव। यच्चोक्तं तदन्यमात्रसंकोचनार्थत्वात्पर्युदासस्येति। तन्न। नेक्षेतेत्यत्र सत्यपि पर्युदासे संकोचाभावात्। न ह्यत्र सामान्येन प्राप्तं तदन्यमात्रे सं
कोच्यते। संकल्पमात्रविधानादित्युक्तमित्यास्तां तावत्। तत्सिद्धं नानुयाजेष्वित्यत्र विकल्पप्रसक्त्या पर्युदासाश्रयणमिति। यत्र तु स आश्रयितुं शक्यते
तत्र तत्प्रसक्तावपि निषेध एवाश्रीयते। यथा नातिरात्रे षोडशिनं गृह्णातीत्यत्र। अत्र ह्यतिरात्रे षोडशिनं गृह्णातीति शास्त्रप्राप्तं अतिरात्रे षोडशिग्रहणं प्र
तिषिध्यत इति विहितप्रतिषिद्धत्वाद्विकल्पप्रसक्तावपि पर्युदासो नाश्रीयते। अशक्यत्वात्। यदि ह्यत्र नञः षोडशिपदेन संबंधः स्वीक्रियेत तदा अ
तिरात्रे षोडशिव्यतिरिक्तं गृह्णातीति वाक्यार्थः स्यात्। तत्र चातिरात्रे षोडशिनं गृह्णातीति प्रत्यक्षविधिविरोधः। अत एवातिरात्रपदेन न नञः संबंधो
न निरात्रे षोडशिनं गृह्णातीति। प्रत्यक्षविधिविरोधात्। अतश्चात्र पर्युदासस्यानुपपत्तेर्निषेध एव स्वीक्रियते। विकल्पोपि स्वीक्रियते अनन्यगतेः।
अतश्चैतत्सिद्धं यत्र तस्य व्रतमित्याद्युपक्रमः विकल्पप्रसक्तिश्च नास्ति। तत्र प्रतिषेधो यथा न कलंजं भक्षयेदिति। यत्र वा विकल्पप्रसक्तावपि पर्युदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सआश्रयितुंनशक्यतेतत्र प्रतिषेधः। यथा नातिरात्रे षोडशिनं गृह्णातीति। एतावांस्तु विशेषः। यत्र विकल्पापादकः प्रतिषेधः तत्र प्रतिषिध्यमानस्यना
नर्थहेतुत्वं। उभयोरपि विधिनिषेधयोः क्रत्वर्थत्वात्। यत्र तु न विकल्पः प्रसज्यते प्राप्तिश्च रागतः प्रतिषेधश्च पुरुषार्थस्तत्र निषिध्यमानस्यानर्थहेतुत्वं।
यथा कलिंजभक्षणस्य। दीक्षितो न ददाति न जुहोतीत्यादिषु तु दानहोमादीनां शास्त्रप्राप्तावपि पुरुषार्थत्वेन प्राप्तत्वात् क्रत्वर्थत्वेन च प्रतिषेधात् तुल्यार्थ
त्वाभावेन न विकल्पप्रसक्तावपि न तेषामनर्थहेतुत्वं रागतः प्राप्त्यभावात्। रागतः प्राप्तस्यापि क्रत्वर्थेन प्रतिषेधे तदनुष्ठाने क्रतोर्वैगुण्यं। नानर्थोत्पत्तिः।
यथा स्वस्र्युपगमनादिप्रतिषेधे रागतः प्राप्तस्य पुरुषार्थत्वेन प्रतिषेधे निषिध्यमानस्यानर्थहेतुत्वमिति दिक्। तत्सिद्धं निषेधानां पुरुषार्थानुबंधित्वं। त
एवं सर्वस्यापि वेदस्य पुरुषार्थानुबंधित्वं॥ ॥अहंतमनुसरामः॥ ॥तदेवं यथा विध्यादीनां अध्ययनविध्युपात्तानां नानर्थक्यं एवमर्थवादानामपि तदु
पात्तत्वेनानर्थक्यानुपपत्तेः स्वार्थप्रतिपादने च प्रयोजनाभावात् लक्षणया प्रयोजनवदर्थपर्यवसानं वक्तव्यं। ते चार्थवादा द्विविधाः। विधिशेषा निषेधशेषाश्चेत
त्र वायव्यं श्वेतमालभेतेत्यादिविधिशेषाणां वायुर्वै क्षेपिष्ठा देवतेत्यादीनामर्थवादानां विधेयार्थस्तावकतयार्थवत्त्वं। बर्हिषि रजतं न देयमित्यादिनिषेधशे
षाणां सोऽरोदीदित्यादीनामर्थवादानां तु निषेध्यनिंदकतयेति। अत्र च लक्षणया प्राशस्त्यं अर्थवादे बोध्यते। तच्च प्राशस्त्यज्ञानं शाब्दीभावनायामिति ७८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वेन संबध्यते। परस्य प्रकृतं तत्सिद्धं वक्ष्यमाणार्थभावनाभाव्यकालिङादिज्ञानकारणिका प्राशस्त्यज्ञानेतिकर्त्तव्यताका शाब्दीभावनालि

कर्त्तव्यतात्वेन संबध्यते। परस्य प्रकृतं तत्सिद्धं वक्ष्यमाणार्थभावनाभाव्यकालिङादिज्ञानकारणिका प्राशस्त्यज्ञानेतिकर्त्तव्यताका शाब्दीभावनालि

उक्तांशे नोच्यत इति। ननु केयं शाब्दीभावना उच्यते। पुरुषप्रवृत्त्यनुकूलो व्यापारविशेषः स एव विध्यर्थः। लिङादिश्रवणे यं मां से प्रवर्त्तयतीति तस्यैव

यमेन प्रतीतेः। यत्तु लिष्टसाधनत्वं विध्यर्थ इति तन्न। तथा सतीष्टसाधनमिति शब्दस्य विधिशब्दः पर्यायः स्यात्। न च पर्यायत्वं युज्यते। संध्योपासनं ते

इष्टसाधनं तस्मात्तत् कुर्विति सहप्रयोगात्। पर्यायाणां च सहप्रयोगाभावात्। अतश्च व्यापारविशेष एव विध्यर्थः। स च लोके पुरुषनिष्ठोऽभिप्रा

यविशेषः। वेदे तु पुरुषाभावाच्छब्दनिष्ठ एव प्रेरणापरपर्यायः इत्युक्तं। ननु लोके शब्दनिष्ठप्रेरणापरपर्याये व्यापारे शब्दप्रयोगाभावे न शक्ति

हाभावात् कथं तस्य विधिशब्दात् प्रतीतिरिति चेत्। सत्यमेतत्। तथापि बालस्तावत् स्तनदानादौ स्वकृतरोदनादिजनितमातृप्रवृत्तेः स्वाभिप्रायरूप

प्रवर्त्तनाज्ञानजन्यत्वावधारणात् स विधिकप्रयोजकवाक्यश्रवणसमनन्तरभाविनीं प्रयोज्यवृद्धप्रवृत्तिमुपलभ्य तत्कारणत्वेन तस्य प्रवर्त्तनाज्ञान

मनुमिमीते। यद्यपि भोजनादौ स्वप्रवृत्तेः समिहितसाधनताज्ञानपूर्वकत्वावधारणात् प्रयोज्यवृद्धप्रवृत्तेरपि तत्पूर्वकत्वाध्यवसायनं युक्तं। तथाप्यन्य

प्रेरितप्रवृत्तौ प्रवर्त्तनाज्ञानजन्यत्वस्य कम्मातृप्रवृत्तौ दर्शनेन प्रयोज्यवृद्धप्रवृत्तेरपि अन्यप्रेरितप्रवृत्तित्वात् कारणत्वेन प्रवर्त्तनाज्ञानस्यैवाध्यवसानं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तच्चप्रवर्त्तनाज्ञानमन्वयव्यतिरेकाभ्यांप्रयोजकवाक्यजन्यमित्यवधारयति।तत्रचावापोद्धापाभ्यांप्रवर्त्तनायांविधिशक्तिमवधारयति।प्रवृत्त्यनुकूलोव्यापारः
प्रवर्त्तनासचव्यापारःप्रैषादिरूपोविविधइतिप्रत्येकंव्यभिचारित्वांद्विधिशब्दवाच्यत्वानुपपत्तेःप्रवर्त्तनासामान्यमेवविधिशब्दवाच्यमितिकल्पयति।एवंचविधिश्र
वणेप्रैषादिरूपस्यवक्त्रभिप्रायस्यप्रवर्त्तनात्वेनैवरूपेणप्रवृत्तिर्नविशेषरूपेण।तथैवशक्तिग्रहणात्।विशेषरूपेणानुप्रतीतिर्लक्षणयैव।एवंचवैदिकलिङ
दिश्रवणेपिप्रवर्त्तनासामान्यमेवप्रतीयते।तत्रकोसौव्यापारइत्यपेक्षायांप्रैषादिरूपस्यवक्त्रभिप्रायस्यापौरुषेयेवेदेनुपपत्तेः।शब्दनिष्ठएवप्रेरणापरपर्या
यःकश्चिद्व्यापारइतिकल्प्यते।अतश्चशब्दनिष्ठएवप्रेरणापरपर्यायोव्यापारःशाब्दीभावनासैवचप्रवर्त्तनात्वेनरूपेणविध्यर्थइति।अयमेवचार्थोअभिधाभा
वनामाहुरन्यामेवलिङादयइतिवार्त्तिकस्य।अभिधीयतेअनेनेतिव्युत्पत्त्याअभिधाशब्देनशब्दउच्यते।तद्व्यापारात्मिकाभावनालिङादिवाच्येतिकेचिदा
चार्याः।अन्येत्वाहुः।सत्यंप्रवर्त्तनासामान्यंविध्यर्थः।तथैवशक्तिग्रहात्।प्रवृत्त्यनुकूलश्चव्यापारःप्रवर्त्तना।अपौरुषेयेचवेदेप्रैषादेरसंभवात्कश्चित्पुरुषप्र
वृत्त्यनुकूलोव्यापारविशेषःकल्पनीयः।विधिशब्दाभिधेयप्रवर्त्तनासामान्यस्यविशेषमन्तरेणापर्यवसानात्।तत्रकोसौव्यापारइत्यपेक्षायांधात्वर्थगतंस
मीहितसाधनत्वमेवेतिकल्प्यते।तस्यापिप्रवृत्त्यनुकूलत्वात्।सर्वोहिसमीहितसाधनतांज्ञात्वाप्रवर्त्तते।अन्यप्रेरितोपियदीष्टसाधनतांनजानातितदानै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व प्रवर्तते। स्वतंत्रप्रेरणावादे पि तदाक्षिप्तसमीहितसाधनताज्ञानं स्वीक्रियत एव। अन्यथा विधेः प्रवर्तकत्वानुपपत्तेः। अतश्चावश्यकत्वात्समीहितसाधनत्वेन प्र
वर्त्तनात्वेन रूपेण विध्यर्थः। एवं च विधिशब्दस्यान्यनिष्ठव्यापारबोधकत्वं लोकसिद्धं भवति। किं च शब्दे एको व्यापारः स्पंदाद्यतिरिक्तः कल्पनीयः। तस्य च स्वस्व
प्रवृत्तौ पराधीनप्रवृत्तौ वाकारत्वेन क्लृप्तस्य प्रवर्तनात्वेन रूपेण ज्ञातस्य प्रवृत्त्यनुकूलत्वं शब्दस्य च परनिष्ठव्यापारज्ञापकत्वेन क्लृप्तस्य स्वनिष्ठव्यापारबोधक
त्वं विधेश्च प्रवर्तकत्वनिर्वाहार्थं धात्वर्थस्य समीहितसाधनत्वमिति कल्पनाद्वरमावश्यकस्यैव समीहितसाधनत्वस्य प्रवृत्तिहेतुत्वेन क्लृप्तस्य प्रवर्तनात्वेन रूपे
ण विध्यर्थकल्पनं। लाघवात्। अन्यनिष्ठत्वाच्च। न च विधेः प्रवर्तकत्वनिर्वाहार्थं समीहितसाधनत्वकल्पना। प्रेरणानभिधाने च विधेः प्रवर्तकत्वाभावाद्धात्वर्थ
स्य समीहितसाधनत्वकल्पकमेव नास्तीति वाच्यं। प्रवर्त्तनाभिधाने नैतन्मतेपि विधेः प्रवर्तकत्वात्। विध्यभिहितस्य च प्रवर्त्तनासामान्यस्य विशेषमंतरे
णापर्यवसानात्समीहितसाधनत्वाक्षेपकत्वात्। न चेष्टसाधनस्य विध्यर्थत्वे संध्योपासनं तेदृष्टसाधनं तत्वं कुर्वीतेति सहप्रयोगानुपपत्तिरिति वाच्यं।
दृष्टसाधनत्वस्य विशेषरूपेण विधिनानभिधानात्। प्रवर्तनात्वेन रूपेणाभिधानात्। सामान्यशब्दस्य च विशेषशब्देन दृष्टः सहप्रयोगः। यो वा लरा
जाद्युपद्रवत्यादौ। तस्मात्समीहितसाधनत्वेव प्रवर्त्तनात्वेन रूपेण विध्यर्थः॥ सैव तेन रूपेण शब्देनैवाभिधीयत इति शाब्दी भावना। तदाहुर्वार्त्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यायप्र०

कस्याप्ययमेवाभिप्रायः। अभिधीयते सा अभिधा समभिहितसाधनता सैव प्रवर्तनात्वेनाभिहिता पुरुषप्रवृत्तिं भावयतीति भावना तां लिङादय आहुरि-
ति। यथाहुः। पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः। प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनामिति। तस्मिन् यजेतेत्यत्र लिङ्त्वांशेन शाब्दी भावनोच्यते।
आख्यातांशेन चार्थी भावनोच्यते। ननु केयमार्थी भावना। कर्तृव्यापार इति चेत्। न यागादेरपि तद्व्यापारत्वेन भावनात्वापत्तेः। न चेष्टापत्तिः तस्य प्रकृ-
त्यर्थत्वेन प्रत्ययार्थत्वाभावादिति चेत्। अत्राहुः। सत्यं न यागो भावना किंतु स्वर्गेच्छया जनितो यागविषयः प्रयत्नः सा भावना। स एव चाख्यातांशेनोच्य-
ते। यजेतेत्याख्यातश्रवणे यागे यतेतेति प्रतीतेर्जायमानत्वात्। यश्च यत्नपूर्वकं गमनादि करोति तस्मिन् देवदत्तो गमनं करोतीति करोतिप्रयोगदर्शनात्।
वातादिना स्यन्दमाने तु नायं करोति किंतु वातादिनास्य स्पन्दो जात इति प्रयोगात् करोत्यर्थस्तावत्प्रयत्न एव। करोति सामानाधिकरण्यं चाख्याते दृश्य-
ते। यजेत यागं कुर्यात् पचति पाकं करोति गच्छति गमनं करोतीति। अतश्च करोति सामानाधिकरण्यात् प्रयत्नस्याख्यातवाच्यत्वं। न च रथो गच्छतीति
ति प्रयोगानुपपत्ती रथे प्रयत्नाभावादिति वाच्यं। बाढं स्वगतं प्रयत्नं रथे आरोप्य प्रयोगोपपत्तेः। यन्मते त्वन्योत्पादानुकूलं व्यापारसामान्यं भावना तन्मतेपि
रथे गमनातिरिक्तव्यापारानुपलब्धेः रथो गच्छतीति प्रयोगस्यैवौपचारिकत्वमेवेति। अतश्च प्रयत्न एवार्थी भावना। यथाहुः। प्रयत्नव्यतिरिक्तार्थभावनात्तु

४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न शक्यते। वक्तुमाख्यातवाच्यैरुपस्कृतेत्यपरम्य नद्दति। अन्येत्वाहुः। भवितुर्भवनानुकूलो भावकव्यापारस्तावद्भावना यस्मिन् व्यापारे कृते करणं फलो
त्पादनाय समर्थं भवति तादृशो व्यापार इति यावत्। स एव चाख्यातार्थः कुठारेण छिनत्तीति आख्यातश्रवणे हि भवत्येतादृशी मतिः। कुठारेण तथा व्या
प्रियेत यस्मिन् व्यापारे कृते कुठारेण छेदनं भवतीति। एवं यजेत स्वर्गकाम इत्यस्यायमर्थः। यागेन तथा व्याप्रियेत यस्मिन् व्यापारे कृते यागात्स्वर्गो
भवतीति। स च व्यापारः क्वचिदुद्यमननिपतनादिः कश्चिच्चाग्न्याधानादिब्राह्मणतर्पणान्तः कथं भावाकांक्षायां विशेषरूपेण पश्चादवगम्यते। अ
न्योत्पादानुकूलत्वेन सामान्यतस्त्वाख्यातादेव। रथो ग्रामं गच्छतीत्यत्राप्याख्यातेन ग्रामप्राप्त्यनुकूलो व्यापार एव प्रतीयते। रथस्तथा गमनेन व्या
प्रियते यस्मिन् व्यापारे कृते गमनात् ग्रामप्राप्तिर्भवतीति प्रतीतेः। न त्वत्र गमनमात्रमाख्यातार्थः। तस्य धातुनोक्तत्वात्। तत्र कोसौ व्यापार इत्यपेक्षा
यां पूर्वोत्तरावान्तरदेशविभजनसंयोजनरूप इति पश्चादेव गम्यते। पूर्वं पाप्रदेशेन विभज्य उत्तरेण संयुज्य रथो ग्रामं गच्छतीति प्रयोगात्। उद्यम्य निपा
त्य कुठारेण छिनत्तीतिवत्। देवदत्तः प्रयतते इत्यत्रापि देवदत्तस्तथा व्याप्रियते यथा प्रयत्नो भवतीति। प्रयत्नानुकूलो व्यापार एवाख्यातार्थो न तु प्रयत्नः।
तस्य धातुनोक्तत्वात्। व्यापारविशेषापेक्षायां च चक्षुरादिः पश्चादवगम्यते। उद्यमननिपतनवत्। तथा च सर्वत्रानुगतस्यान्योत्पादानुकूलं व्यापारस्य।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मान्यमेवाख्यातार्थः। न तु प्रयत्नमात्रं। रथो गच्छतीति देवदत्तः प्रयतत इत्यादिषु तदभावात्। न चौपचारिकत्वं वक्तुं युक्तं। मुख्ये संभवति तस्यान्याय्यत्वात्।
करोत्यर्थोऽप्युत्पादानुकूलो व्यापार एव न प्रयत्नमात्रं। करोतेश्चेतनाचेतनकर्तृकाख्यातसामानाधिकरण्यादिति। तत्सिद्धं अन्योत्पादानुकूलो व्या
पारोऽर्थीभावनेति॥ सैव च यजेतेत्यत्राख्यातांशेनोच्यते। भावयेदिति। तस्याश्च भाव्याकांक्षायां स्वर्गादिर्भाव्यत्वेन संबध्यते। करणाकांक्षा
यां यागादिः करणत्वेन संबध्यते। प्रयाजादय इतिकर्तव्यतात्वेन। एवं च यजेतेत्यादिना स्वर्गोद्देशेन यागादेर्विधानात्सिद्धं यागादेर्धर्मत्वं। प्रयोज
नमुद्दिश्य वेदेन विहितत्वादिति। सोऽयं धर्मो यदुद्देशेन विहितस्तदुद्देशेन क्रियमाणः तद्धेतुः। श्रीगोविंदार्पणबुद्ध्या क्रियमाणस्तु निःश्रेयसहे
तुः। न च तदर्पणबुद्ध्यानुष्ठाने प्रमाणाभावः। यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति स्मृ
तेः। अस्याश्चाष्टकादिस्मृतिवत्प्रामाण्यादित्यन्यत्र विस्तरः। क्वाहं मंदमतिः क्वेयं प्रक्रिया भट्टसम्मता॥ तस्मादुक्तेर्विलासोऽयं गोविंदगु
रूपादयोः॥१॥ ॥ग्रंथरूपो मदीयोऽयं वाग्व्यापारः सुशोभनः॥ अनेन प्रीयतां देवो गोविंदो भक्तवत्सलः॥२॥ ॥इति श्रीअनंतदेवसू
नुना आपदेवेन कृतं मीमांसान्यायप्रकाशसंज्ञकं मीमांसाप्रकरणं समाप्तं॥ ॥श्रीमत्स्वयंभूरामेश्वरः सुप्रीतो भवतु॥ ॥

४८

KKSU LIBRARY RAMTEK 441 106 M-1665 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=28.09.20 11:36
,TRANSFERRED=2020/09/28 at 11:50:28
,PAGES=98
,TYPE=STD
,NAME=S0003741
,Book Name=M-1665-MIMANSANYAY PRAKASH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection